काव्यसंग्रहः

प्रकाशकः
मूल्यं १) संस्कृतकार्यालयः, अयोध्या

015,1NPsx1,1
J1K

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

SRI JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 6822

सूचना

काव्यसंग्रहस्य सर्वाः कविताः संस्कृतस्य विभिन्नाङ्केषु प्रकाशिता अनेककर्त्रीनां, येषां नामानि तेष्वेव प्रकाशितानि सन्ति । एतत्प्रकाशनावसरे कवीनां परिचयदानस्याप्यासीदस्मदिच्छा अत एव कविताभिः सहैव नामानि न प्रकाशितानि ।

… तान्यपि नैत्र । एतन्मध्य एव
… गणतैत्र वृद्धिमाप प्रत्युत शरीरपा
… विलयमाप । इदानीं विविधका
… शक्त इति तैर्हीन एव प्रका
… र्पणे वा द्वितीये भागे स·
… दित्समीति सूचयति—

पं० कालीप्रसादशास्त्री

015,1NPSx1,1 6822
J1K
Kaliprasad Shastri
Kavya sangraha.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

O15, 1NPSx1, 1
J1K

6822

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महात्माविजयः

महात्मगान्धिर्महितापदानः क्षितौ समन्तात् प्रथिताभिधानः ।
मनोवचःकर्मभिरेकरूपो महात्मनामप्यभवन्महात्मा ॥
लोकं स दृष्ट्वा तमसाभिभूतमुद्वेगमुद्वेलमवाप्य चित्ते ।
तं भासयन्नुज्ज्वलमात्मभासा भास्वानिवाद्योतत गोसहस्रैः ॥
हीनानदीनैः परिभूयमानान् विलोक्य लोकं स विनेतुकामः
स्वार्थं विदूरे तृणवद्विधूय परार्थमात्मानमदाद्दयालुः ॥
परार्थसम्पादनदीक्षितस्य स्वार्थाद्विमुक्तस्य महात्मनोऽस्य ।
करस्थिता यष्टिरुपानहौ च सर्वस्वमासीदपरं न किञ्चित् ॥
इत्थं स निष्किञ्चनतां गतः सन्नकिञ्चनानामभयं विधास्यन् ।
वित्तेन मत्तां जनतां समस्तामुपादिशद्धर्ममुदारचेताः ॥
लोकाः स्वकीयत्वधिया किमर्थं द्वेषः परेषु क्रियते भवद्भिः ।
विश्वं जगद्विश्वसृजोऽर्थजातं न युष्मदीयं न च वाऽस्मदीयम् ।
स्वार्थेषु वात्सल्यमसह्यशल्यं द्वेषोऽन्यभूतेषु विषादबीजम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दूरं द्रुतं शत्रुधियापहाय विशन्तु सौहार्दपथं भवन्तः ॥
परस्परप्रेमरसावगाढैः प्राप्येत लोके कुशलं मनुष्यैः ।
परस्परद्वेषतुषानलस्तु ज्वलन् क्रमाद्दह्यति सर्वलोकम् ॥
सर्वे जना विश्वसृजस्तनूजाः परस्परं सोदरतां भजन्ति ।
तस्मादमी पैतृकमर्थजातं सम्प्राप्तुमर्हन्ति समं समेऽपि ॥
समानरूपेषु जनेषु लोके नीचोच्चतादृष्टिरसाधुसृष्टिः ।
गवादिषु ग्राम्यमृगेष्वपीह न दृश्यते सेवकसेव्यभावः ॥
सृष्टौ समायां जगतीतलेऽस्मिन् राजप्रजाभावमतिर्विनिन्द्या ।
सिंहासनं सिंह इव प्रजानां भयैकहेतुत्वमभिव्यनक्ति ॥
यद्यस्ति साम्राज्यविधौ समीहा समाद्रियध्वं विभु रामराज्यम् ।
रामः प्रजानामभवन्न राजा तासां स्वयं सेवकतामयासीत् ॥
रामः स्वजायामपि वर्जयित्वा प्रजाः प्रजाः स्वा इव रक्षति स्म ।
आशां पिशाचीमिव बाधमानां किं वा भवन्तो न विहातुमीशाः
न जिह्मता राजति राज्यतन्त्रे न च प्रजापीडनमीडितं वः ।
किं भ्रातृवर्गस्य वधार्थमेवं तीक्ष्णीकुरुध्वे समरायुधानि ।
युष्मद्विभूत्यै ननु भूमिपालास्तथ्यं च पथ्यञ्च वचो ब्रवीमि
अस्त्राणि शस्त्राणि च संहरन्तः सर्वेषु भूतेषु दयां कुरुध्वम् ॥
अपास्य दूरे समरप्रयासं प्रयच्छत द्रागभयं प्रजानाम् ।
हिंस्रत्वमास्थाय किमर्थमेवं मनुष्यलोकं विपिनं विधद्ध्वे ॥
हिंसां परित्यज्य भजन्त्वहिंसां सा कामदा कामगवी भवित्री ।
यद्धिंसया साधयितुं न शक्यमहिंसया तत्सुकरं भवेन्नः ॥
शाक्तैश्च शैवैरखिलैश्च शाब्दैस्तत्तन्मतीयैरभिधीयमानः ।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
Acc No. ....
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सत्यं परं राघव एक एव तमेव विप्रा बहुधा वदन्ति ॥
पयांसि मुक्तानि पयोधरौघैर्यथाम्भसां राशिमभिद्रवन्ति ।
तथा नमांसि प्रभुमेकमीशं विशन्ति नानाजनसाकृतानि ॥
एवं गतेऽर्थे असधर्मभेदः कथं भवेद् द्वेषविषस्य हेतुः ।
अतो मतान्यत्वकृतो विरोधः समूलघातं विनिहन्तुमर्हः ॥
सत्यात्मकोऽसौ भुवनस्य गोप्ता सत्येन नित्यं भवति प्रसन्नः ।
तस्य प्रसादार्थमसायवृत्तेर्मायां परित्यज्य भजन्तु सत्यम् ॥
मायाश्रियं सादरमर्चयन्तस्तया जनान् वञ्चयितुं यतध्वे ।
परातिसन्धानपरा नृपालाः पराजयं यान्ति दुराग्रहेण ॥
वाग्वर्षधारां विकिरन् स इत्थमशिक्षयत् क्षोणितलं महात्मा
विमुक्तदर्पो विगताभिमानः शिष्योऽभवत् तस्य मनुष्यलोकः ॥
पुंस्कोकिलो भारतवर्षवृक्षात् कूजन् मनोज्ञं मधुरस्वरेण ।
हिंसानहिंसाश्च धराधिवासान् सम्मोहयामास सचेतनौघान् ।
आमन्त्रितो मन्त्रिभिरादरेण स्वाराज्यसन्धानचिकीर्षयाऽसौ
लण्डन्नगर्यां परिषत्सभायां साश्चर्यमश्रूयत भाषमाणः ॥
सूक्तं यदीयाद्वदनारविन्दान्माध्वीकधारामधुरं मनोज्ञम् ।
सुभाषितं हर्षितसर्वलोकं निपीय तृप्तिं न गतो जनौघः ।
सुधामुचं तामुपदेशवाचमाचारतो दर्शयितुं महात्मा ।
अयन्नहिंसासरणिं नवीनां स्वराज्यसङ्ग्रामसमुद्यतोऽभूत् ।
सर्वान् समाहूय स भारतीयानवोचदुर्वीश इवात्मरक्ष्यान् ।
देशोऽयमस्माकमुपप्लुतोऽन्यैर्वन्यैर्मृगैर्व्याघ्र इवातिशोच्यः ॥
आंग्लाः किलास्मानवधीरयन्तः स्वदासकोटौ विनियोजयन्ति ।
कौटिल्यतन्त्रेण विलोभयन्तो धिक्कृत्य कारकृत्य च पालयन्ति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ते डाकिनीं स्वामिह नर्तयन्तो बालानिवास्मानुपलालयन्ति ।
समृद्धसस्याढ्यमिदं हि राज्यं भोज्यं न यच्छन्त्यधुना प्रजाभ्यः ॥
स्वयं हरन्तोऽखिलमर्थजातमस्मानन्थें विनिपातयन्ति ।
तदर्दिता भारतभूमिरेषा कथं नु मानैकघनैरुपेक्ष्या ।
तद्राज्यतन्त्रेण नियन्त्रितैषा केनाप्युपायेन विमोचनीया ।
अशास्त्रभाजश्च रणे वयं तां नैवाधिगन्तुं प्रभवो भवामः ॥
एवं गते वस्तुनि किं नु कुर्मः स्वराज्यलाभश्च कथं भवेन्नः ।
इत्थं भवद्भिर्न विचिन्तनीयमस्त्यत्र रम्यः सुगमश्च पन्थाः ॥
भक्तित्वमाश्रित्य भवन्तु वस्त्रं तदेव नः शस्त्रमशस्त्रभाजाम् ।
दुःशासनाद्भारतभूमिरेषा रक्ष्येत तेन द्रुपदात्मजेव ॥
समाश्रयन्तोऽसहकारमार्गं नृपालकार्याद्विरता भवन्तु ।
त्यजन्तु राज्ञोपहृतानुपाधीन् विदेशवस्तूनि विवर्जयन्तु ॥
वित्तस्य चित्तस्य च नाशहेतुं मुञ्चन्तु सर्वेऽपि च मद्यपानम् ।
पारावारम्बुधेः सैन्धवमाहरन्तु कारागृहे प्राघुणिका भवन्तु ॥
मा नाम यच्छन्तु बलिं मृताय कुर्वन्तु तच्छासनलङ्घनं च ।
विद्वांश्च बद्धाञ्जलयो नमन्तु बाह्वोर्बलं जातु न दर्शयन्तु
स्त्रियः पुमांसः स्थविरा युवानः कैस्ता मुसल्मानमतानुगाश्च ।
सर्वेऽप्यहिंसासमरे क्रमन्तामलङ्घनीया खलु सङ्घशक्तिः ।
हिंसाप्रधाने प्रधनेऽतिघोरे जयाजयौ संशयितौ सदैव ।
अस्मिन्नहिंसासमरेऽतिशान्ते निश्चप्रचं नो वृणुयाज्जयश्रीः ॥
आङ्ग्लास्तु नः सौहृदभाजनानि न तेषु विद्वेषलवोऽपि कार्यः ।
किन्तु क्षमाभारधुरन्धराणामस्माकमेतैर्भरणं न युक्तम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्मादहिंसासमरं समन्तात्समेऽपि सम्भूय समारभध्वम् ।
सद्धर्मं संश्रित्य कृतं हि कर्म फलाय कल्पेत न संशयीध्वम् ॥
तद्वीरनिध्वाननिरस्तनिद्रास्तद्वाक्यपीयूषरसं निपेव्य ।
समेधितोत्साहभराः सुवीराः सज्जा बभुवुः समरोत्सवाय ॥
तदुक्तमार्गेण रणाऽभियुक्ताः कशाभिघातैः कलिताङ्गभङ्गाः ।
सहस्रशो लक्षश एव वीराः कारागृहान् सस्मितमेव जग्मुः ॥
ते भारतं खण्डमखण्डमेव विधाय सङ्ग्रामभुवं समन्तात् ।
गिरः शरानुग्रतरान् किरन्तो रणाङ्गणे चेलुरलोलचित्ताः ॥
राजाज्ञया रक्षिजनैरधर्माद् दण्डाहतिर्या विहिता जनेषु ।
अश्रायि सा मङ्गलतूर्यघोषः स्वराज्यसम्प्राप्तिशुभार्थशंसी ॥
अदृष्टपूर्वक्रमणे रणेऽस्मिन् शस्त्रस्य सैन्यस्य च मोघभावात् ।
कर्तव्यमूढा नृपतेर्भुजिष्याश्चित्ते भृशं व्याकुलतामवापुः ॥
वृत्तो समाः काश्चन सम्प्रहारे प्रक्षिप्यमाणेषु वचःशरेषु ।
निकृत्तचित्ताः परिपन्थिवर्गाः स्वराज्यदानाय मतिं बबन्धुः ॥
आङ्ग्लास्ततो लोकगुरुं तमेनं प्रशस्य शिष्यत्वमुपेत्य चास्य ।
स्वराज्यमस्मै गुरुदक्षिणावत् समर्पयन्ति स्म नयोपपन्नाः ॥
लोकोत्तरैस्तस्य गुणैरुदारैरावर्जिता भारतराज्यलक्ष्मीः ।
अदृष्टघातानकृताश्रपातान् स्वयं समासेवत भारतीयान् ॥
अनात्तशस्त्रः कटिबद्धवस्त्रः कुटीरवासी विकसन्मुखश्रीः ।
गीताख्यदण्डं स्वकरे दधानो निराकरोति स्म पराधिकारम् ॥
हिंसारतं लोकमसावहिंसामशिक्षयन्नूतनमभेद्यमस्त्रम् ।
यस्याग्रतः सर्वमुदग्रमुग्रं कुण्ठत्वमायास्यति शस्त्रजातम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

घोरासुरस्फोटगतां सशक्तिं विस्फोटयन् स्वस्य गिरां महिम्ना ।
लोकोत्तरामात्मगतां विभूतिं प्रकट्यकार्षीद्विकटप्रभावः ॥
गिरां शराणां च मिथो विरोधे गिरां शरेभ्यो बलवत्तरत्वम् ।
प्राचीकटद्वाग्मि विशारदोऽसौ शास्त्रार्थनोन्मादजुषांपुरस्तात् ॥
सत्याग्रहं सत्यपथानुवृत्तिं सत्यं वचश्चैव निषेवमाणः ।
प्रमाणमन्तःकरणप्रवृत्तिं विधाय कर्माण्यखिलान्यकार्षीत्
नोपासरल्लोभपरैर्वचोभिर्नापासरत्तर्जनगर्जनैर्वा ।
न्याय्ये पथि न्यस्तपदः स्वकीये न जातु सुच्यग्रमपि व्यचालीत्
चिकीर्षितं साधयितुं यतात्मा यदोपवासव्रतमन्वतिष्ठत् ।
तदाऽखिलद्वीपवती चचाल मही महामारुतकम्पितेव ॥
महात्मसंसर्गवशादनेके लोके प्रसिद्धिं लघवोऽप्यवापुः ।
'यर्वाड' कारागृहचत्वरस्थश्चूतद्रुमस्तत्र निदर्शनं नः ॥
श्रीरामरामेति जपन् स भक्त्या विमोच्य बन्धाङ्कुरतस्य भूमिम्
मुक्तिप्रदां तारकमन्त्रशक्तिं प्रकाशयामास वशीकृतात्मा ॥
जिह्वा कृपाणेन विशीर्यमाणा दृष्टा धृता वा न तु जिह्वया सः
अहो कृपाणः कृपणो नृपाणां तज्जिह्वया जर्जरतामनायि
कौपीनधारी खलु वामनोऽयमित्थेवमन्यैरवधीरितः प्राक्
यदात्मनो विक्रममभ्यनैषीत् तदा महानित्यवधारितोऽभूत्
स चक्रवर्ती मुकुटाहतेऽपि स राजराजो वसुना विनापि
यथैर्नृपालैर्नृवरैश्च सर्वैरवन्द्यतैतस्य पदारविन्दम् ॥
स तन्तुवायोऽपि कृषीवलोऽपि दरिद्रनारायणसेवकोऽपि ।
आसेदिवान् स्थानमशेषवन्द्यं महत्त्वहेतुर्न धनं कुलं वा ॥
स लब्धराज्यः सुमनाः समर्प्य कृतघ्नतामाकूलनराधिपाय ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपादिशत् प्रेमभराभिनुन्नः कर्तव्यमर्थं प्रति भारतीयान् ॥
वेदैरशेषैरखिलैः पुराणैः शास्त्रैश्च सर्वैरुपदिष्टमर्थम् ।
विचार्य विज्ञाय च तत्त्वदृष्ट्या सनातनं धर्मपथं श्रयध्वम् ॥
परस्परं भावनया स्वधन्तः परोपकारे निरता भवन्तु ।
श्रेयांसि सर्वाण्यधिगत्य सर्वे लोके समुत्कर्षमवाप्नुवन्तु ।
जनेषु सर्वेषु समानभावः प्रेमार्द्रता सोदरभावना च ।
एतानि देशाभ्युदयस्य बीजान्यासेतुशीताचलमापतन्तु ॥
स्वकीयविद्यां परिशीलयन्तः प्रीत्याऽन्यदीयामपि लालयन्तः ।
सम्भावयन्तश्च परस्परेषामन्योन्यमैत्रीमभिवर्धयन्तु ॥
वर्णेषु सर्वेष्वपि सौहृदय्यं मतेषु सर्वेष्वपि सामरस्यम् ।
स्त्रीषु स्वर्गेष्वपि साम्यभावः समाद्रियन्तामिह भारताऽर्याः ।
हिन्दीं विधत्ताखिलराष्ट्रभाषां स्वमातृभाषामपि चाद्रियध्वम् ।
गीर्वाणवाण्यामुपदिष्टमर्थमष्टासु दिक्षु प्रकटीकुरुध्वम् ॥
सुरालयं व्यत्ययतो गृहीत्वा भ्रमेण मागच्छत मद्यगेहम् ।
तं वस्तुतो देवगृहं विदित्वा तत्र प्रवेशं कुरुतात्मशुध्यै ॥
अस्पृश्यता नाम जरत्पिशाची चिरादिदं भारतमावसन्ती ।
उत्पाट्यतामुत्पदप्रापिकासैः प्रत्यूहयन्ती शुभकर्ममार्गम् ।
नाडम्बरैरन्यविडम्बनैर्वा देशः समुच्छ्रायमुपैति जातु ।
किन्त्वात्मसंस्कारविलुप्तदोषो निरस्तनास्तिक्यमतिश्च कास्ति ॥
पाश्चात्यदेशीयपरिष्कृतिर्या विज्ञानमात्राधिगतप्रतिष्ठा ।
भजन्तु तां ज्ञानमयूखमृष्टां लोकस्य भव्याय भवेत्तदा सा ॥
गाः पालयन्तः कृषिमुत्कृषन्तो गृहे गृहे तन्तुचयान् वयन्तः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वदेशशिल्पानि च शीलयन्तो ग्रामान् रमावासभुवः कुरुध्वम् ॥
सर्वेऽपि विद्याबरतामुपेत्य प्रकाश्य लोके निजसौमनस्यम् ।
स्वीयं बुधत्वं च भुवि प्रसार्य भूलोकमेनं कुरुत द्युलोकम् ॥
इत्येवमाद्यै रुदारवाक्यैः सम्बोध्य सर्वानपि भारतीयान् ।
हिन्दूमुसल्मानजनेषु सख्यं मुख्यं स विज्ञाय तदुन्मुखोऽभूत् ॥
यावन्न रागं विनतानुगेषु वचोऽमृतैरंकुरितं व्यधत्त ।
तावद्यमस्येव भटः सटोपस्तदन्तिकं कश्चिदुपाजगाम ॥
कृतान्यकर्मा त्वरितं महात्मा सायन्तनं प्रार्थनमाचरिष्यन् ।
यदा मुदा चत्वरभूमिमागात् तदा रवः प्रादुरभूत् कठोरः ॥
तं ध्वानमीशेन कृतं महात्मा प्रस्थानघण्टारवमाकलय्य ।
सीतापतेः पावनमङ्घ्रियुग्मं नमन्निव क्षोणितले पपात ॥
हाहामुखस्तत्र महाजनोघः किमेतदित्याकुलभीतभावः ।
अरम्यरम्यस्त्रमाकारमपश्यदग्रे सगर्वदर्वीकरवत्करालम् ॥
त्वय्यम्ब भूयो मम जन्म भूयादितीव धात्रीमुपगूहमानः ।
श्रीराम रामेति गिरन् विशोकः शोकाम्बुधौ लोकममज्जयत सः

धन्या वयं मानववरेण येन येनावनिः प्राप नवं प्रकाशम् ।
कालोऽप्ययं येन कृतः कृतार्थः सोऽयं त्विषां धाम गतोऽस्तमर्कः ॥
पौरस्त्यदेशाधिगतात्मजन्मा जगत्प्रबोधं जनयन् समन्तात् ।
सम्प्रेरयन् नर्मसु जीवलोकं तेजोनिधिर्हन्त ! गतोऽस्तमर्कः॥
तस्मिन् प्रमीते भुवनैकबन्धौ जनप्रवाहाः परितः समेताः
पुष्पाणि बाष्पैः कलुषीकृतानि समर्पयन्ति स्म वपुष्यमुष्य ॥
बाला युवानः स्थविराः स्त्रियश्च विस्मृत्य सर्वे मतधर्मभेदान्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

समागतास्तत्र समेऽपि लोकाः शोकादमुञ्चन् समसश्रुधाराम् ॥
महात्मनो वह्निशरेण वेधो लोकेऽखिलस्याजनि वज्रपातः
तस्मिन्नुदन्ते प्रसृते दुरन्ते झटित्यचालीदचलाऽखिलाऽपि ॥

तस्मिन् दिने क्वापि न हासवार्ता न चापि लोके क्वचिदुत्सवोऽभूत्
सर्वत्र सम्भ्रान्तिजुषां जनानां कोलाहलः केवलमाविरासीत् ॥

अहो महान् भारतभाग्यराशिराशीविषो राजकदुर्नयस्य ।
अकिञ्चनानामुदयाचलोऽसावस्ताचलः काञ्चनगर्वभाजाम् ॥
धीमानहिंसासमरप्रवीरः सत्याग्रही सत्पथसञ्चरिष्णुः ।
स्वराज्यसंग्रामभटाग्रयायी राष्ट्रप्रतिष्ठाजनको जयाढ्यः ॥
सिंहासनोद्वर्तनचण्डवातस्तमश्चयोच्चाटनतिग्मभानुः ।
निर्जीवनाप्यायनवारिवाहः प्रलप्रपञ्चाहितनूलसृष्टिः ॥
जगन्महापोतपथप्रदीपः प्रभञ्जनो भूमिपतिद्रुमाणाम् ।
दवानलो दोषसरीसृपाणां कल्पान्तकालः कपटोच्चयस्य ॥
वाचस्पतिर्वागमृताभिवृष्टौ महर्षिरच्छद्मपथानुवृत्तौ ।
अहो जगज्ज्योतिरभूद्विलीनमित्येवमुच्चैर्व्यलपज्जनौघः ॥
तद्वार्तया दुर्भरतापभाजां सबाष्पकण्ठं रुदतां जनानाम् ।
कियन्ति वाऽश्रूण्यपतन् धरायामितीममर्थं वसुधैव वेत्ति ॥
तत्पादसेवामकरोच्चिरं या सा पादुका शोकभराभिभूता ।
दृष्ट्वैव तस्याग्निशरेण वेधं क्वचित् तिरोऽभूत्कतिचिद्दिनानि ॥
महात्मनो हस्ततले गृहीतो दण्डोऽपि दान्तश्चिरसेवनेन ।
अनन्यसमोक्कारमताडयित्वा स्वयं क्षितौ मूर्च्छितवत्पपात
अनन्यसमोक्तर्यपि रक्तभावं व्यक्तं वितन्वन्निव मुक्तरोषः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रक्तस्य बिन्दून् कतिचित्पृथिव्यामपातयत् तस्य हृदब्जकोशः ॥
ततो महात्मन्यपनीयमाने सङ्ख्यातिगैः सम्मिलितैर्जनौघैः ।
को वेत्ति का स्यादधिका विसृष्टा किं पुष्पवृष्टिः किमु वाष्पवृष्टिः

पुरैव पुण्यो यमुनाप्रवाहः संस्पर्शमात्रेण विधूतपापः ।
सम्प्रत्यमुष्याखिलपावनस्य संसर्गतः पुण्यतरीकृतोऽभूत् ॥

चितां महात्मन्यधिरोप्यमाणे चिन्तां पराभारुरुहुर्जनौघाः ।
सोऽपश्यदन्याहृशमात्मतेजस्ते त्वन्धकारागमनन्वभूवन् ॥

अस्तप्रतामेत्य विलस्य चक्षुः कृत्यानि कृत्वा जगतो हिताय ।
वाचां पतिः सम्प्रति मुक्तदेहो विधेर्नियोगादस्तमागात् ॥

महात्मनस्तस्य वियोगमेनं लोकस्य तेजोऽस्तमयं च वाणः
आस्वानमज्जद्यमुनातटिन्यां मित्रानुरूपं प्रकटय्य रागम् ॥

शान्ते जनौघे तमसि प्रवृद्धे मन्दं स्वनन्ती यमुना स्रवन्ती ।
एकाकिनी तद्विरहासहिष्णुमुं क्वार्तनादेव करोद नक्तम् ॥

सुभाषितोद्भासितसर्वलोको यो लोकशान्त्यै बहुधाऽयतिष्ट ।
लोकोऽद्य लोकान्तरवर्त्मभाजस्तस्यात्मनः शान्तिमिह ब्रवीति ॥

तदीयभस्मामितशक्तियुक्तं संसेव्यमाने महताऽऽदरेण ।
मन्ये, धरित्रीमुपतापभाजमुल्लाघयेच्छत्रुभयं व्यपोह्य ॥

आगात् स लोकान्तरमात्मतेजो निधाय सर्वेषु जनेषु लोके ।
एकः स यल्लोकहिताय चक्रे विधीयतां तन्निखिलैर्जनौघैः ॥

यथा जनो बोधयतेऽतिदूराद्वाकशवाण्या स्वविवक्षितं नः ।
तथेश्वरो दूरभुवि स्थितोऽस्मानुपादिशद्गान्धिमुखेन तत्त्वम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महात्मनस्तस्य महोपदेशं सभाजयन्तः सततं स्मरन्तः ।
तद्दर्शितेनैव पथा व्रजन्तो लोकाः समस्ताः सुखिनो भवन्तु ॥

हरिरिव पुरुषाणामुत्तमश्चक्रपाणि—
र्हर इव जितकामो योगिनामग्रगण्यः ।
विधिरिव विबुधाग्र्यः सत्यलोकाधिनेता
जयतु जगति गान्धिर्व्यासगीतप्रभावः ॥



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नलोदन्तम्

प्रथमः सर्गः

श्रीमान्निषधभूपालो नलो नाम यशोधनः ।
आसीदसज्जनद्वेषी चन्द्रान्वयसमुद्भवः ॥
सतां मतो मतिमतां वरो वरगुणान्वितः ।
प्रजाक्षेमोत्सुकः शूरः शशास विधिवद्धराम् ॥
गृहोद्याने यथाकामं कदाचित्सञ्चरन्नृपः ।
स्वपन्तं कमले हंसं ददर्श मदनोपमः ॥
अथाग्रहीत्तं भूपालः कुतुकाविष्टमानसः ।
दयालुरथ तं शीघ्रं मुमोच युवको नलः ॥
उवाच कलहंसस्तं कलं वचनमानतः ।
भक्तोऽहमुपकारी च त्वयि मत्प्राणदातरि ॥
करिष्यामि तव प्रीतिं प्रीतो भूया दयानिधे
सुजनश्लाघिनस्सर्वैस्सद्गुणैस्तव सर्वथा ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनुरूपा पयोजाक्षी दमयन्ती विदर्भजा ।
त्वय्येनामनुरक्तां तां करिष्याम्यस्तु मङ्गलम् ॥
हंसो जगामेत्युक्त्वासौ विदर्भनगरीं मुदा ।
सालद्वयतालीमध्यस्था गुञ्जापुञ्जे मणिय[थ]ा

तेन हंसं स्वयानेन शिक्षायन्तीव चारुणा ।
कन्दुकोत्क्षेपणायाससस्वेदमुक्ताफलाञ्चिता ॥
निःश्वासवेगोच्चलितस्तनकुड्मलयुग्मला ।
शिथिलाम्बरविन्यस्तकररक्तसरोरुहा ।

कुतूहलादद्भुतस्मेरा लीलालोलालसेक्षणा ।
समीक्ष्यमाणो वालाभिर्विस्मयस्तिमिताक्षिभिः
समीपमगमत्तासां सलीलमथ स द्विजः ॥
उपानयदुपायेन मनोहरतनुं रहः ।

उवाच स नलोदन्तं मनोहरमशेषतः ॥
श्रुत्वा तद्वचनं बाला प्रेमलज्जाकुलाक्षरा ।
उवाच कलहंसं तं मधुरं मधुभाषिणी ॥
सदारमेनं राजानं यथाभवदभीप्सितम् ।

द्रष्टुं भवतु ते भाग्यमपरं किमहं ब्रुवे ॥
वाक्यं दृढीकृतं तस्याः श्रुत्वा हंसोऽथ सत्वरम्
गत्वा निषधभूपालं गत्वा सरसमूचिवान् ॥
भवत्येव स्थिरप्रेमामवेहि नृपनन्दिनीम् ॥

शृण्वाणमिति तं राजा ननन्द नयकोविदः
परस्परप्रेमदामभूषितावपि कामुकौ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तौ निन्यतुरुदासीनौ दिनानि विरहातुरौ ॥
अथैकदा नृपो भीमो विचार्य नृपबन्धुभिः ।
समारभत साकूतं सुतापरिणयोत्सवम् ॥
समाहूते नले याते वृषाग्नियमपाशिनः ।
तमाहुरमरश्रेष्ठा नतं पथि विकल्मषम् ॥
शुभं भवतु ते दूतो भवाद्य दमसोदरीम् ।
वशां मयि कुरु श्रीमन् त्वदीयवचनामृतैः ॥
चतुर्णामेकमस्माकं वृणोतु मृदुभाषिणी ॥
तिरस्करणिकां विद्यां दद्मस्तुभ्यं सुदुर्लभाम् ।
तत् श्रुत्वा कन्यकागेहं गतोऽदृश्यः परैर्नलः ॥
तथा तिरस्कृता यूयमिति तान् प्रत्यबोधयत् ।
स्वयम्बरसभामध्ये रराज रमणीमणिः ॥
यूनामपाङ्गभृङ्गानां पुष्पिता लतिकेव सा ॥
वर्णितेषु महीशानामपदानेषु साधुषु ।
धात्रीभिश्चानुया ताभिर्न ननन्द नलोत्सुका ॥
तथा मन्दं प्रयातायै सा तस्यौ नलपञ्चकम् ।
आदर्शयदहो धात्री भैमी तु विषसाद च ॥
स्तुतैर्देवैश्च मुदितैः प्रदर्शितममुं नलम् ।
नलेभ्यश्चाथ पञ्चेभ्यो ददर्श बरवर्णिनी ॥
सन्देहं सपदि विहाय सन्मुहूर्ते,
मन्दाक्षप्रणततनुः प्रहर्षिणी सा ।
सन्तानद्रुमसुमनव्यभव्यगन्धां,
मालां तद्गलभुवि योजयांचकार ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वितीयः सर्गः

इन्द्रादिभिः सुरवरैर्नन्दितस्तद्वरान्वितः ।
बन्धुभिर्मानितः प्रीतः प्रतस्थे वीरसेनजः ॥
प्रियासमेतो भूपालः प्रविवेश निजां पुरीम् ।
प्रत्युद्गतो नागरिकैस्समलङ्कृततोरणाम् ॥

तयारमत तन्वङ्ग्या कलासु निपुणो नलः ।
दिनानि निमिषाणीव निनाय दयिताहृतः ॥
तयोर्भाग्यवतोर्जातौ पुत्री पुत्रश्च कोमलौ ।
भृशं मुमुदिरे सर्वाः प्रजा अपि च बान्धवाः ॥

एकदा भूपतेस्तस्मात् पुष्करः कलिचोदितः ।
द्यूतेनापाहरत् सर्वास्सम्पदश्च रसामपि ॥
अहो दशावैपरीत्यं कं नरं नैव बाधते ।
तावुभौ जग्मतुर्घोरं काननं मानिनां वरौ ॥

कलिना दुर्मनास्त्यक्त्वा स्वांके निद्रावतीं प्रियाम्
कान्तां क्लान्तां महाघोरे कान्तारे निशि सोप्यगात् ॥
विलपन्ती मुक्तकण्ठं दमयन्ती भयाकुला
विकिरन्ती बाष्पपूरं विचरन्ती हताशया ॥

महाहिना ग्रस्तपादा हन्त दान्तसहोदरी ।
रुरोदोच्चैस्तरां हा हा पाहीति विजने वने ॥
श्रुत्वा तद्रोदनं कश्चिदागतोऽथ वनेचरः ।
हत्वा तं कातरामेनां ररक्ष प्रकृतोऽपि सः ॥

चटुलाभ्यां कटाक्षाभ्यां तनुसौन्दर्य्यधारया ।
कुटिलालकपाशैश्च सोऽप्यस्याः पीडितोऽभवत् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रणयप्रार्थनारूपैरश्लीलैर्वाक्छरैः स ताम् ।
पीडयामास कामान्धः श्मश्रुकीर्णोत्कटाननः ॥

सोऽभवच्चपलस्तस्याः सर्वतोऽधिकदुःसहः ।
शापाग्निनाऽकरोद्भस्मसात्तं तीव्रपतिव्रता ॥
कैश्चिद्वणिग्जनैः साथ नीता चैद्यनृपालयम् ।
तत्र मातुः सहोदर्या सहाज्ञाताऽवसत्सती ॥

वैरसेनिस्तु कान्तारे कान्तां स्मृत्वाथ विस्मरन् ।
पुनः स्मृत्वा च बभ्राम कलिबाधाविलाशयः ॥
पाहि मां नल पाहीति श्रुत्वा चोच्चैः स रोदनम्
गत्वा तद्देशमद्राक्षीन्नागं कर्कोटकं नृपः ॥ १६

शापाग्निश्लिष्टवपुषं दवाग्निपरिवेष्टितम् ।
तं गृहीत्वा ततोऽगच्छत्तातः पुत्रमिवाशु सः ॥
तमुद्धृत्य प्रयातेऽस्मिन् भूपतौ भुजगेश्वरः ।
शापाद्विमुक्तो भूत्वास्य वक्षस्याशु ददंश सः ॥

तद्विषाग्निसमाक्रान्तो नलः सर्वाङ्गसुन्दरः ।
विरूपोऽभूद्दीर्घबाहुरशुचिर्वामनस्तदा ॥
उवाच भुजगश्रेष्ठो वचनं क्षेमसूचकम् ॥
मद्दंशनं भवेन्नूनं श्रेयसे तव भूपते ॥
भवता त्यज्यतामेतत्तापो वैरूप्यहेतुकः ॥

यदा समीहसे रूपं स्वीयं चारु पुरातनम् ।
तदैतद्धारय श्रीमन् दिव्यमंशुकमंशुमत् । २२
इत्युक्त्वा वसनं तस्मै दत्वा भोगिनि निर्गते ।
तदादाय मुदा भूयस्सोऽप्ययोध्यां समाविशत् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऋतुपर्णमहीपालः सारथ्ये सूदकर्मणि ।
विशारदं बाहुकाख्यं ज्ञात्वा स्वीयं चकार तम् ॥

पाकसारथ्यसामर्थ्यात्कृतार्थे पार्थिवे वसन् ।
बाहुको बाहुजोऽप्यत्र राजसेवापरायणः । २५ ।

पुरा परान्नदोऽप्येष परान्नोऽभूदहो विधिः ।
परो भवति यस्यैवं भविष्यति नृपोऽपि सः ॥

रजनीषु हन्त वरमञ्जुभाषिणी
विरहातुरो रहसि तद्गुणोत्करम् ।
कवयन् कथञ्चन दिनानि चानयत्
बहुधा नृपेण बहुमानितोऽपि सः । २७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तृतीयः सर्गः

भीमोऽथ पुत्रीवृत्तान्तं समाकर्ण्य विषोपमम् ।
शुशोच सुतरां धीरः कः सहेत्स्वसुतापदम् ।
सान्त्वयन् दयितां तस्यास्सवित्रीं शोकविह्वलाम् ।
चिन्तयामास कर्तव्यं बन्धुभिः सह मन्त्रिभिः

ततस्सम्प्रेषयामास सम्यान् दिक्षु विदिक्षु सः ।
मुग्धान् विमुग्धान् दूतान् तामन्वेष्टुमिष्टपेश्वरः ॥
चारानपि च सञ्चारशीलानथ विशारदान् ।
विश्वासयोग्यान् मतिमानविश्रमपरिश्रमान् ।

अथायन्सर्वदेशेषु पारितोषिकचोदिताः ।
नगरेष्वप्यनेकेषु विपिनेष्वचलेषु ते ॥ ५ ॥
कश्चिद्द्विजोत्तरो देशसञ्चारार्थमिव स्वयम् ।
कदाचिच्चैद्यनगरीमाविवेश यथासुखम् ६ ।

मानितः पूजितस्तेन पार्थिवेन यथोचितम् ।
विश्रामार्थमिवोवास काञ्चिद्दिवसान्यसौ ।
स कथां कथनोद्युक्तः शुद्धः शुद्धान्तमाविशत्
तत्र तां राजनारीणां मध्ये भैमीं ददर्श सः ।

वियोगवह्निना तप्तां गूहितेन महीयसा ।
विहाराहारहारादीन् विस्मरन्तीमिव स्वयम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हे देवि ! केयं तरुणी भवत्याः सहवर्तिनी
तच्चरित्रं यथातथ्यं श्रोतुमिच्छाम्यशेषतः ।

इत्युक्ता तेन सा राज्ञी तमुवाच सविस्मया ।
रोमाञ्चकञ्चुकां भैमीं गूढमालोक्य लज्जिताम् ॥
कदाचिदागता कान्तं मार्गमाणा विकल्मषा ।
मया ह्यामन्त्रिता चात्र विश्रामाय वसत्यसौ ॥

अथोवाच महीदेवो मया दृष्टा पुरा पुरे ।
निषधेन्द्रोषधीशास्या कामिन्येषा सहाश्रये ॥
एनां मन्ये वीरसेनवधूमित्यनघेऽनघाम् ।
तस्या दृष्टान्तमाख्यास्ये भीमेन प्रतिबोधितम् ॥

यदि भैमीयमलिके चारुबिल्वदलोपमम् ।
लाञ्छनं दर्शयिष्यामः पश्य चन्द्रोपमं मुखम् ॥
अथांशुकाञ्चलेनाशु राज्यास्तस्या ललाटिकाम्
विदित्वा तां तदा भैमीं राज्ञी चान्यजना अपि ॥

सूतिका इव सन्तापसन्तोषान्तरसंस्थिता ।
पुनश्च दीश्वरो भैमीं रथिभिश्च पुरस्सरैः ॥
प्रस्थापयामास साध्वीं सहितां महितैर्महाम् ।
पितुर्निकेतनं बाल्यलीलासाक्षिद्रुमावृतम् ॥

निर्निमेषगवाक्षाक्षीं दृष्ट्वा तां मुमुदे भृशम् ।
महीसुरानुयातां तां सुतां माता पिता च तौ ॥
दृग्भिः पपतुरानन्दबाष्पाभिः सह नागरैः ।
विनयावनतां साश्रुलोचनां तां नृपः पदे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उत्थाप्यानुग्रहं चक्रे चिन्तागद्गदया गिरा ।
घ्रा समालिङ्ग्य राज्ञी च तनुजां क्लेशकर्शिताम् ॥

धारां तत्तापशान्त्यर्थमिव सन्तोषजाश्रुभिः
मात्रा प्रचोदिता भीरुर्वनयात्रादिकं यथा ।
उवाच दयनीयं तद् वृत्तान्तं स्वजनानिमान् ॥

तस्याः सन्तापशान्त्यर्थमानन्दोत्पादनाय च ।
किं चकार न भूपो हि प्रजाक्षेमोत्सुका जनाः ॥

उपवनभुवि पुष्पिताग्रवल्ली—
तरुगणगन्धवहोऽपि गन्धवाहः ।
अरमयत न भीमजा हृदन्तं,
न सविरहसु सतीषु मोदहेतुः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चतुर्थः सर्गः

विदर्भोऽथ वियोगार्तां पुत्रीं दृष्ट्वा समातुरः ।
जामातरं समानेतुं यत्नमारभत स्वयम् ॥
राज्ञा नियुक्ता दूतास्तमन्विष्यैव विनिर्गताः ।
तेषां कश्चित्समागत्य भैमीमेवमुवाच ताम् ॥

शृणु वत्से ! वाहुकाख्यमृतुपर्णस्य सारथिम् ।
सन्दिह्येऽहं तमानेतुं गूढं यत्नं कुरु द्रुतम् ॥
पुनर्विवाहप्रस्तावयुक्त्यानेतुं सवाहुकम् ।
ऋतुपर्णं मनस्विन्या नियुक्तो भूसुरः सुधीः ॥

स्वयम्बराय भूयोऽपि द्विजेनामन्त्रितो नृपः ।
प्रतस्थे क्लेशमुत्सार्य सूतोक्त्या दीर्घतोऽध्वनः ॥
नीतस्य वाहुकेनास्य त्वरया स्यन्दनस्य सः ।
राजातिविस्मितो दूतं तां विद्यामभ्ययाचत ॥

तदाश्वहृदयं दत्वा लब्ध्वाक्षहृदयं नलः ।
रराज कलिना मुक्तश्चन्द्रमा इव राहुणा ॥
भैम्याः पुनर्विवाहार्थमृतुपर्णे सवाहुके ।
कुण्डिनं प्रतियातेऽस्मिन् भीमस्तं प्रत्यपूजयत् ॥

विवाहघोषरहितां नगरीं प्रेक्ष्य लज्जितः ।
निगूहयामास धीमानयोध्याधीश्वरः कथाम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नृपाय निर्मितं तस्मै वाहुकेन विशेषतः ।
अन्नपानादिकं गूढमास्वाद्याश्वासमाप सः ॥

इन्द्रसेनेन्द्रसेनौ च दमयन्ती तनूजनी ।
दृष्ट्वाथाङ्के समारोप्य वाहुकस्तावचुम्बयत् ॥
श्रुत्वा विचेष्टितं तस्य वाहुकस्य सखीमुखात् ।
तं द्रष्टुकामा सा साध्वी सौधादवततार च ॥

सखीभिः सविधं नीतां परिष्कारविवर्जिताम् ।
दुःखितां परिशुष्काङ्गीं दृष्ट्वा तापमवाप सः ॥
विलक्षणाङ्गं कल्याणी परेषां दर्शने परम् ।
पराङ्मुखा तमालोक्य धर्मभीता बभूव सा ॥

पुनर्विवाहवित्रस्तमानसोऽप्यथ वाहुकः ।
पवित्रामेव तां ज्ञात्वा परमानन्दमाप सः ॥
पुरा कर्कोटकेनासौ दत्तं दिव्यांशुकं दधौ ।
सदाथ शुशुभे राजा द्विजराज इवाम्बरे ॥

तस्य रूपान्तरप्राप्तिं समीक्ष्य मकरेक्षणा ।
शचीव मुमुदे जिष्णोः पीयूषप्राशनेन सा ॥

तदनु सा सविलासमुपेत्य तत्
सविधमाशु ननाम धृतादरा ।
स दयितो दयितां परिषस्वजे
वरतनुं रतनुन्नमनोरथः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निशांतमाविश्य विशांपतिस्तां
निशां निशेशाननया समेतः ॥
मिथोवियोगावसरादिभूतां
कथां कथञ्चित्कथयन्निनाय ॥

अन्येद्युरात्मीयकथाञ्च गुप्तां,
नलोऽप्ययोध्याधिपमात्ममित्रम् ॥
सम्भाव्य सर्वामवदत् सभायां ।
सामात्यसामन्तसतीर्थ्यकायाम् ॥

श्रुत्वा तदीयवचनानि सभास्थितेषु
वाष्पाविलास्यकमलेषु च विस्मितेषु ।
प्रोवाच वाचमुचितामृतुपर्णभूपो,
भूयोऽनुतापविवशो विशदाक्षरं सः ॥

अपराधमजानता मया कृतमुर्वीश यदि क्षमस्व तत् ।
महता महिते समागते न भवेन्नूनमहो तिरस्क्रिया ॥

त्वत्कृपाकुशलभाजमन्यथा मामिमं गणय मा महामते
अप्यनन्यशरणो कृतज्ञ इत्याह तं तदनु वीरसेनजः ॥

ऋतुपर्णनलाविति ब्रुवन्तौ,
दृढमैत्रीपरिरम्भणार्द्रभावौ ।
परिरेजतुरश्विनाविवेतौ
ननु कूलङ्कषतोषसिन्धुमग्नौ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जामातुः समुपागमोत्सवसवे पूर्णं विरामं गते,
भीमो बन्धुजनान् तथा क्षितिसुरान् सामन्तभूपालकान्
दिव्यैराभरणैर्महार्घमणिभिर्गोभिश्च सम्भाव्य तान्,
सम्मान्याथ यथोचितं स्वभवनात् प्रस्थापयामास सः॥

भीमभक्ताग्रणीर्भीमजाकामुको,
भीमसेनायुतो भीतिदाख्यान्वितः।
भीषणोऽथ द्विषां शेषरूक्षेक्षणो,
भीवियुक्तोऽविशन्नैषधीयां पुरीम्॥

परैः प्रविष्टा नलराजधानी स्वनाथमुद्वीक्ष्य समागतं सा
निमील्य वातायनलोचनानि रजःपटे हन्त तिरोहिताभूत्
वीरसेनजचमूरथोद्धता सामधूलिपिहितार्कमण्डले।
पुष्करः सपदि तद्रणोद्यमे दुर्जयोऽपि शरणं जगाम तम्

प्रजाननैः स्वयं पूज्यः परमानन्दतुन्दिलैः।
तज्जयोद्घोषनिर्घोषपूरिताशः पुरं गतः॥
भूयः समागतं लब्ध्वा भर्तारं जनसंहतिः।
न्यवसन्निर्भया नित्यं निलीनेव नले नृपे॥



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुरन्दरचरितम्

श्रीमद्विलाससदनङ्कमलालयायाः,
कल्याणभोगपरिभूषितभावगर्भम् ।
अध्यासितम्मुरभिदा कविकाव्यभूमा—
वासीत्पुरन्दरपुरं त्रिपुरारिणाऽपि ॥

कल्पद्रुमो मयि महोदयहेतुरित्थ—
म्मानेन मत्तमत एव सुखानवाप्यम् ।
स्वर्गम्पुरन्दरपुरं हसतीव चैत—
त्कल्पद्रुमायितचराचरसत्वजातैः ॥

पूर्णे पतन्ति सुकृते चरितातिपुण्याः
स्वर्गादधो भुवि वचः श्रुतिगीतमेवम् ।
मन्ये परन्तदधिकं सुखमीहमानाः,
सर्वे पुरन्दरपुरन्त इदम्विशन्ति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्याधिपः स्वभुजवीर्यजितारिवर्गः,
कान्त्या शशाङ्क इव पूर्णतमो गताङ्कः
वाग्देवताऽयतनभूतमुखाम्बुजश्री—
र्नाम्ना पुरन्दर इति प्रथितो बभूव ॥

पत्नी पुरन्दरपतेर्गुणधाम मूर्त्तं,
साध्वीसमूहगणने प्रथमावतारा।
विद्याभिराश्रितपदा निखिलाभिरासीद्
देवी धरा हरिहयस्य पुलोमजेव ॥

राज्यं समृद्धमुदितं वयसा युवत्वं,
पत्नी धरा च कुरबिन्दसकान्तिदन्ती।
आरोग्यमाश्रितजनः प्रभुचित्तवर्ती,
श्रीमत्पुरन्दरविभोर्विभवावतारः ॥

तौ दम्पती रघुपतेः पदयोरुपासां —
चक्रात ईश्वरमपि प्रणयेन भक्त्या।
लोकोपमेयचरितौ सुतलाभकामौ,
कामप्रदावपि जनाय वनीयकाय * ॥

देवी तदैव समधत्त पयोव्रतं सा,
पुत्राप्तये सनियमङ्कथितम्पुराणैः।

---

* वनीयको याचकः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भुङ्क्ते हविर्वसुमतीतल एव शेते,
वस्तेऽवदातवसनञ्च च नक्ति लोकान् ।

कश्चित्पुरन्दरपतेरसमीक्ष्यकारी
लुब्धो बभूव सचिवः स विचिन्त्य तत्त्वम्
एष प्रसङ्ग इति चापि विमृश्य चित्ते,
भूपम्बभाण वचनं रहसि प्रकाशम् ॥

राजंश्चिराय विजयस्व यशोधनोऽसि
तस्मात्तवैव कुशलाय वदामि किंचित्
सर्वः प्रियम्वदजनो न हिताहितो ते,
पश्यत्ययं निजनिजोदरपूरणार्थः ॥

दैवी धराऽऽचरति सम्प्रति यद् भवन्त—
स्तत्त्वेन तन्नयवता तु विमर्शितं वा ।
पुत्राप्तये तदिति वाक्यपरम्परेयं,
लोकप्रलोभनपरा निजकर्मसिद्धिः ॥

योषाः स्वभावकुटिला दयया विहीना
घ्नन्ति प्रियम्पतिसुतात्मजमौषदर्थं
व्यासो जगाद वचनन्तदवेहि सत्यं
विद्वान्नविश्वसितिवाच्चिकदापितासाम्

देवोऽवधारयतु सत्यमिदं वचो मे,
पत्न्युर्दशीकरणतन्त्रविधिः स घोरः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वैराङ्गनाननविनिर्गतवाममार्गः
सद्वंश्यभूपकुलकीर्तिकलङ्ककर्ता ॥

नैके मनस्विमुनयो नृपपुङ्गवा वा,
दोर्दण्डनिर्जितयशोविसराः सरागाः ।
स्त्रीभिर्वशीकरणतन्त्रबलेन पूर्वं
क्रीडामृगैकपदवीमचिरेण नीताः ॥

अभ्यर्थये धरणिवासव ! ते पदाब्जं,
तन्त्रं समापय समाप्तमिदन्न यावत् ।
स्नेहोऽस्तु वां क्षम ममानधिकारचेष्टां,
गच्छामि गेहमिति स प्रययौ दुरात्मा ॥

वेधा न वेत्ति वनिताचरितं दुरन्तं
कुर्याद्धराऽनुचितकर्म कदापि नैवम् ।
इत्याकलय्य मनसा स पुरन्दरोऽपि
दोलायितान्तरगतिर्विमना इवाभूत् ।

देवालयं विशति मंक्षु निरस्य तस्मा
द्देवीविलाससदनं स तया विहीनम् ।
हाहेति निःश्वसति नैव सभाम्प्रयाति
प्रेक्ष्यादसीयनियमान् कलुषान्तरङ्गः ॥

नाहारमाहरति नाद्रियते च निद्रा-
[illegible]ऽपि वक्ति वचनञ्च सुहृद्गणेन।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वचक्षुषी सरसजीवनजे जलार्द्रे
रक्के इवाकथयतां गुरुदुःखभारम् ।

पत्युर्दशान्निजभुजिष्यजनाननात्ता —
माश्रुत्य वीक्ष्य च समक्षमियं शुभाङ्गी
देवी धरा रहसि विस्मयरस्मितास्या
पूर्णेन्दुसुन्दरमुखी पतिमावभाषे ॥

मत्प्राणनाथ ! वसुधाऽधिपते ! किमेत
त्वारब्धमत्र भवता विदुषा विचित्रम् ।
येनाकुलीभवति पौरजनो ममात्मा,
तद्राजकं च तव पादयुगैकदेवम् ॥

व्याधिधुनाति न विषण्णगतिः शरीरं,
किं वा पुरन्दरपुरम्प्रति कोपि शत्रुः ।
अव्यकोशशरणं+ त्वयमाश्रितं वा
किम्बालयाऽक्षिनवया मुषितं मनस्ते ॥

अज्ञानतः किमपराद्धमहो मया वा,
जाने न हेतुमपरं भवतो दशायाः ।
आभाष्य भूपमिति सा चपलेव सिन्धौ
तस्यापतत्पदयुगे करुणं रुदन्ती ॥

*भुजिष्यः परिचारकः +कोशगृहम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चण्डे ! गदस्त्वमसि मेऽरिरपि त्वमेव
नाशाय हेतुरपरो न ममासरस्य ।
गोपायितुं स्वकृतकर्म तवाभियोगः,
साक्षादसौ रहसि धूलिविसर्गयुक्तिः ॥

भूत्वेह निष्पतिसुता कुलटेव वाटी-
माश्रित्य पान्थशरणं भवितुन्तवेहा,
दुष्टे ! कलङ्कितकुले ! त्रपसे न कस्मात्
व्याली विलोलरसना परिपालिताऽसि

एवं वदन् कदलिकामिव वायुकम्पां
संवेपतीमथ पदोरुचपेटघातैः ।
सन्ताड्य कोपदहनार्पितचित्तहव्यः,
सद्यः प्रधानजनतामिदमादिदेश

एनामसाधुचरितान्नगरोपकण्ठे,
निर्माय सद्म नवमेव तमःप्रकाण्डम् ।
संस्थापयध्वमचिरेण भुनक्तु पापं,
कारागृहं निगडबन्धनमेव माऽस्तु ।

आदिश्य सौधमिति तान् सचिवान्प्रयाते
भूपे परेतमिव दण्डधरस्य चाराः ।
वाह्वोः पदोरहह ते कचपक्ष एके,
व्याकृष्य नि[illegible]... [illegible]म्बलिनो बहिस्तात् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पौरा विचुक्रुशुरहो नयने किमन्धे,
जाते न नः श्रुतिबिले बधिरे धरेशे ।
अन्यायमाचरति नीतिमिवाशुभज्ञो
देवीं विसृज्य कुररीमिव तारनादाम् ॥

सर्वम्पुरन्दरपुरं विददार तस्याः,
शोकध्वनिः प्रतिरवेण पुरप्रलापः ।
आम्नायसौत्तिकमपि व्यथितं मुमूर्च्छ,
नित्यार्चितस्य कथनं किमु गोधनस्य ।

या नागपत्तननिवासिजनस्य पूर्वं
पांचालराजदुहितुः कचकर्षणाय ।
दुःशासने चलति दुःखमयी दशाऽभूत्
सैवाविरास नगरेऽपि पुरन्दरस्य ॥

यस्मिन् पुरन्दरभियेव न वाति वायुः,
सूर्यातपो बिशति वा न च चन्द्रकान्तिः ।
तस्मिंस्तमिस्रततिसङ्कुलिते निकाय्ये*
देवी धरा निवसतिस्म ससौविदल्ला+ ।

एकाऽपराह्णसमये सचिवैः पवित्रै--
रानीतमश्रुमुदकं सकृनाददाति ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

* दीपकाख्यो भिक्षुः + गोविन्दः कञ्चुकी ।

स्वात्मापराधमधुनापि न जानती सा
साध्वी जगाद वचनं स्वगतं तदानीम्

पुत्रार्थिनौ समचरन्नियमं यमेनं,
किम्मन्त्रतन्त्रविधिभिर्विगुणः स जातः ॥
यत्कीर्तनं सकलपूर्तिकरं हरेस्त
न्मामातिमङ्गलमहो न मयोदितं वा ॥

किम्पुर्वजन्मचरिताघमुदेति सर्व—
मैव स्मरे जनुषि सम्प्रति तस्य गन्धम्
केनावयोरनुपमं प्रणयं समीक्ष्य,
क्षिप्तं विषं वचनरूपमहो दुरन्तम् ॥

कालेन तत्र निवसन्नथ कोऽपि वित्तः
कृत्वा चिराय परदेशगतिङ्गृहाय ।
सम्प्रस्थितः पुरमयं निकषा प्रभाते,
वीक्ष्यालयन्नवमिदं वणिगास मूढः ॥

दूरङ्गताः परिजनास्तुरगद्वितीयः,
कम्भूमिभागमहमेनमदृष्टपूर्वम् ।
प्राप्तः पुरं सरिदिमे तरवः पुराणा,
मामाह्वयन्ति कलहंसकलारवेण ॥

एतत्पुरन्दरपुरम्भ्रम सौधचूडा,
सा संशयस्य पदमेकमर्याकरस्य:

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं विचारशतसङ्कुलितं धरा सा,
सद्यः समीक्ष्य वचनम्प्रियमाबभाषे ॥

बन्धो ! वणिग्वर ! पुरे विश संशयः को
ग्रासं गते भवति राजकृतालयोऽयम्
एकाकिनी दुरितकर्मफलैकमित्रा,
साऽहं वसामि निलये निरये यथा वा

गेहम्भवम्प्रियवचःप्रभवां च देवी-
मालोक्य चेतसि बभूव स कान्दिशीकः* ।
कुण्ठं वचः पुलकिता तनुरश्रुपूर्णौ,
नेत्रे तदस्य हृदयं च चिरं चकम्पे ॥

अश्वं विहाय चरणावभिपीड्य देव्याः
कृत्वांजलिं स्तुतवदेष पुरोऽवतस्थे ।
सुप्तेषु कंचुकिषु लब्धनिजप्रवेशः
किं जातमेतदिति विस्मयितान्तरङ्गः ॥

देवी बभाण वणिजं कुशलं क्व चित्ते
प्राप्तोऽसि दीर्घसमयेन पुरं प्रवासात् ।
कष्टां दशां समवलोक्य ममैव बन्धो,
स्वन्नेत्रयोरियमुदेति यदश्रुधारा ॥

* कान्दिशीको भयद्रुतः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बन्धुः पिता च जननी च तथैव मित्रं,
स्वात्मातिशायि स च सा च तदेव मन्ये
यो दुस्तरापदुदधेर्दययैव दीनान्,
सन्तारयत्यननुचिन्तितभाविभावः ॥

बन्धो ! निजं नय नवं भवनं कृतकर्मा,
धर्मेण कापि भगिनीति विभावयस्व ।
मा भैः पुरन्दरपतेः परिपालयित्री,
स्वात्मार्पणेन समये भविता समर्था ॥

तस्यास्तया करुणया स्वसूक्तकान्ते-
र्वाचा विचारचतुरोऽपि वणिग्वरः सः
मोहं ययौ नि[illegible]नमिदं वदन्ति
क्वायं वणिक्[illegible] च पुरन्दरराजदाराः

देवी विधाय वसनेन [illegible] साङ्गम् ।
कायं तुरङ्गमधिरुह्य तदा तदीयम् ।
धर्मात्मनाऽथ वणि[illegible]नुगम्यमाना,
तस्यालयं प्रकृतिसुन्दरमाससाद ॥

प्राभातिकः स समयः सकलोऽपि लोकः
[illegible] इति [illegible]दिसवृत्तिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतेन भाग्यनगराद्*भगिनी निजैषा—
नीतेत्यतर्कयदतो न पथावरोधः ॥

शीलस्य तस्य वणिजो बहवो भुजिष्या
अन्येऽपि ये जनकबन्धुमुखा गृहस्थाः ।
अन्तःप्रविष्टमवलोक्य धरापदन्ते,
चक्रुर्विचारमधुनैव धराऽपदन्ते ॥

ते मेनिरे सुरपतिं प्रविहाय नाके
केनापि कारणवशेन चलस्वभावा ।
दैवी सुसम्पदियमाविरभूद् गृहे नः,
पुण्येन वा जनुषि पूर्वतने कृतेन ॥

देवी प्रणेमुरपरे भयविह्वलाङ्गाः,
कृत्वांजलिं शिरसि तस्थुरथोचुरेके ।
मातः ! प्रसीद करुणावरुणालयाऽसि,
विश्वेश्वरे ! पद युगं तव शरणं नः ॥

देवीवचोभिरुपलक्षितयोधिचित्त-
लोकान्तरङ्गकरुणाङ्कुररोपकैस्तैः ।
स्निग्धो वणिक्पुरपतेर्न विभाय देवी-
मस्तौच्च दीनभवनं सफलं त्वयेति ॥

* निजामहैदराबाद ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आरुह्य सौधमथ निर्मलमाजुहाव—
स्नेहेन बंधुमिव तं वणिजं धरा सा ।
कैलासकूटवसतिर्गिरिजेव पूर्वं,
सेनान्यमेकशरसंज्ञपितारिवर्गम् ॥

बन्धो ! इति प्लुतवचःश्रवणात्तणेऽयं
देवीप्रसादमभिनंद्य जगाम तूर्णम् ।
सप्रश्रयश्चतममुं चरणोपकण्ठे
सोवाद वागधिपतिं विदितेव विद्या

श्रीमत्पुरन्दरपतेरपराद्धमीदृक्
किं वा जगज्जननि ! सच्चरिते ! भवत्या ।
निर्वासिताऽसि नगरान्निलयाच्च यस्मात्
सीतेव दाशरथिना नयपालकेन ॥

एवं वदन्तमिममालपदाशु देवी
दुःखं तदेव यदहं च न वेद्मि मन्तुम् ।
मन्त्रा भवन्त्यतितमां किल भूपतीनां
गूढाः क्रियैकशरणा इति राजनीतिः

आस्तां तदेतदखिलं वचनावकाशो,
नायं यथासमयमस्तु विचारणीयम् ।

अपराधम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्तव्यमद्य यदवश्यमहन्दयालो,
तुभ्यं तदेव कथये कथनीयकीर्ते !

निर्दिश्य यत्किमपि कारणमद्य भूपं,
भूपालमित्र ! भवनं तव भोजनार्थम्
आमन्त्र्य स्वयमहं विदधे व्यवस्थां,
मा भैः पुरन्दरपतेः सदुदर्क+मेतत् ॥

आज्ञप्त इत्ययमगात् झटिति प्रतीतं*
पौरन्दरोदवसितं+ मणिभिः परीतम् ।
सानन्दकौतुकभरभ्भरपालमित्रं
द्वास्थैः प्रधानपुरुषैश्च वणिग् व्यलोकि ॥

अन्तः प्रविश्य हरिदश्वमिवोदयाद्रौ,
भद्रासने समुपविष्टमयम्भरेशम् ॥
आदाववन्दत शिरः पदयोर्निधाय,
कृत्वांजलिं तदनु तस्य पुरोऽवतस्थे ॥

आहूयतान्तिकमयं पतिना सखेति,
सभ्ये च पश्यति जने निजरत्नपीठे ।
स्नेहादधारि समवादि गदाधरेण,
श्रीधर्मराज इव धर्मपरायणेन ॥

+ भावि फलम् * विज्ञापम् +गृहम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीमान् ! वणिग्वर ! सखे ! भवता प्रवासं
कृत्वा चिरेण बहुलः समपादि वाऽर्थः ।
किम्वा दयाशमदमादियुता महान्तो—
ऽप्यालोकिताः किल सुमङ्गलनामधेयाः ॥

आरोग्यमेव परमङ्गनु दूरदेशे,
द्रव्यार्जनाय यततां वसतां वनेषु ।
कच्चित्तदस्ति वद हेतुमिह प्रभाते
शीतेऽपसर्पति शनैस्तव चागमस्य

भूपं वभाण स तदा तव साऽनुकम्पा,
प्रश्नानुयोगश्च इति मय्यपि दासदासे ।
आरोग्यसज्जनदयाविभवा समं मां,
गङ्गापथा इव सरित्पतिमाश्रयन्ते ॥

देवोऽवधारयतु मेऽनधिकारचेष्टां,
देवप्रसाद इह मां मुखरीकरोति ।
आमन्त्रये तव पदौ सदनेऽशनाय,
निःस्वस्य + मे सफलय प्रियतां क्रियाभिः

ईषद्विहस्य जगदेऽथ महोच्चितैषः,
श्रीमन् ! मनीषितमिदं तव पूर्णमस्तु ।

ॐ पृच्छा + निर्धनस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्नेहः सिनातिॐ महत्स्पर्धिविचारधारां,
लोकोत्तरः सकललोलुपलोकलीलाम् ॥

नत्वा पुरंजनमयं पुनराससाद,
सद्मात्मनः सकलमेनमुदन्तमस्यै ।
देव्यै यथावदभिमानलवेन हीनः,
सप्रेम दत्तमनसे कथयाम्बभूव ।

आरालिका+ रसवती÷ मधिगम्य भक्ताः
पक्वप्रणीतपरमान्न+ मुखान् पदार्थान् ।
पेचुः कणोॐषण+ वितुन्नकॐविश्व+पीत
जीवाॐदियोगरुचिरानथ सत्वरन्ते ॥

जातेऽपराह्णसमये वणिजा द्विजेना
हूतः पुरन्दरपती रथमारुरोह ।
वित्तं वनीयकॐ जनाय जयेति वाचे
शृङ्गाटके+ सवितरन् चलतिस्मसन्दम्

लोष्टुयमानमहिमा मरुताङ्गणेन,
स्वर्गे पुरन्दर इवार्यमिहापि शूरैः ।

ॐषध्नाति, विञ बन्धने क्र्यादिः ÷सूपकाराः ॐपाकस्थानम्
+पायसम् पिप्पली वा अजाजी ॐमरिचः +शिवा वा धन्वधम्
ॐशुण्ठी +शङ्खद्रुम ॐआर्द्रक वा तु +सिन्धुः ॐयाचकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृच्छेद्धणिग्यदि धराचरितं स खिन्नत्वात्,
किं वोत्तरामि किमकार्षमहं विचित्रम् ॥

एवं विचिन्तयत एव मुखं तदीयं
म्लानौ विलोक्य रविभासमिवारविन्दम्
तावद्विभो ! जयजयालय एष एवे-
त्युक्ति नियन्तुरवकर्ण्य समाहितोऽभूत्

गेहं विवेश बणिजः पुरतः स्थितस्य,
राजा गिरेरिव रथादवतीर्य सिंहः ।
पूर्वं विमुच्य बसनं परिधाय नूत्नं
कौशेयमन्यमशनस्य जगाम भागम् ॥

आहारमण्डपतलं बिशदेन मुक्ता-
क्षोदेन विद्रमयुतेन सुसंस्कृतन्तत् ।
पीठैः प्रभूतमणिहेममयैश्च पात्रै—
र्व्याप्तं विलोक्य मुदमाप पुरंदरोपि।

अत्रान्तरे बणिजमागतमन्तरेण ,
देवी शशंस बसनानि विभूषणानि।
भूरीणिमे वितर भूपतिमोहनाय ,
चित्रं विधिं कमपि कर्तुमहं यतिष्ये ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेनाथ खण्डननवाम्बरराशिरस्यै,
प्रादायि किंचिदविचार्य महाशयेन ।
गत्वा बहिः सह महीपतिनाऽशनं च,
प्रारब्धमेव जगदे नरपालसिंहः ॥

राजन्निकामसुपसुंदव तवालयोऽयं,
सर्वे वयं भगवतः परिचारकाः स्मः ।
क्वाहं जडः क्व च भवाननवद्यविद्यः
स्नेहस्तवानुपमतां भजतेऽभयाय ॥

पीताम्बरं कनककुण्डलहारमुद्रा—
केयूरनूपुरपुरःसरमण्डनानि ,
सा बिभ्रती सुरतरावुदिता लतेव ,
स्वर्गस्य लोकजननीव तदा बभासे ॥

व्याजेन भोजनभुवं परिवेषणस्य ,
प्राप्ता धनञ्जयशिखामिव भासमानाम् ।
तां वीक्ष्य भूपतिरबोधि यदा समेयं ,
कारागृहे निवसती किमिदं विचित्रम् ।

किं सौविदल्लनिवहं विनिहत्य भित्तिं ,
भित्वाऽथवा निलयमेनमुपाजगाम ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चित्रं धरा वणिजमाश्रयते स चैनां,
किं वाऽनयोः कलुषिते भिषयो सुवृत्ते ॥

एवं विचिन्तयति भूमिपतौ धरान्या,
वेषं प्रकल्प्य हरितैरथ रत्नवर्यैः ।
संचारिणी सुरतरोरिव पत्रशक्ति—
र्भूयः पुरन्दरपतेः पुरतश्चचार ॥

एषा वशीकरणकर्मणि सम्प्रवृत्ता,
देवी धरा हृदयमत्र मम प्रमाणम् ।
सा नैव नैव वनिता प्रथमा द्वितीया
मोहेन किम भनुते मनुजः सुमन्दः ॥

इत्थं चलत्यवनिपालविचारचक्रे,
कैलासपाण्डुरमलङ्करणं विधाय ।
देवी निसर्गधवला शरदभ्रसङ्घे,
सौदामनीव विचचार पुनः पुरस्तात् ॥

तां तत्र पायसमयं परिवेषयन्तीं
राजा नितान्तमवलोकयदेकतानः ।
कामी न चैव गणयत्यपवादसंघः,
श्रीमान्पुरन्दरपतिः स्वगतं तथाऽऽह ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हे अप्यहो मम न ते अबले सुरूपे,
एषा धरा धरणिभारधराङ्गकान्तिः ।
पापाय किं परपरिग्रहयोः स्वयोषा—
भावो भवेत्कलबोधविलासहेतुः ॥

सम्पन्नभोजनविधिं वसुधाऽधिपालं,
क्रुद्धं श्वसन्तमहिराजमिवांघ्रिपातैः ।
ताम्बूलसेविनमनेकविचारमग्नं,
मन्दं हसन् वणिगुवाच कुतूहलेन ॥

अङ्गावनीश ! महिमा वरिवस्यितश्रुते,
दैवैर्दयोदयविकस्वरशील एषः ।
आदेहबन्धममरे मयि सर्वभावै—
र्वर्वेतु तत्र भवता सखितोपगीते ॥

ओं ओं वदन् कलुषितं निजमन्तरङ्गं
भ्रूबन्धलोहिततमेक्षणवागभावैः ।
तम्बोधयन्नथ रथेन पुनः स्वगेहं,
प्रत्याययौ सपदि भूमिपतिर्विलक्षः+

भूपे गते स जगदे धरया महात्मन् !
कालः करालकरवालसहोदरोऽयम् ।

* उपचारः । + विस्मयान्वितः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रासादहर्म्यवनवस्थितिसंघगेहे,
भूपो विभाव्य भविता त्वयि संशयालुः

यावन्न राजपुरुषा मम ते वधाय,
प्राप्ताः पुरन्दरपतेरनुशासनेन ।
तावत्पलाय्य विषयान्तरसम्प्रवेशः,
श्वःश्रेयसाय+यशसे समयेन भूयात् ॥

इत्थं विचार्य करिणीमधिरुह्य तूर्णं,
तौ कापथेन चतुर्दिशमीश्वरस्य*
अन्हैककेन गगने किल पक्षिणाञ्च-
कोशाध्वनःसमवलो करशीकराद्राम्+

राजाऽथ संसदि निशम्य जनाननात्तां,
वार्ताविशेषकुपितः प्रतिजज्ञ एतत् ।
ताभ्यां विना न च विशेयमगारमेत—
श्लोकाः । सजीवभुजबद्धशरीरभृद्भ्याम्

त्रिंशोत्तरं शतमयं दिवसेन यान्तीं,
क्रोशस्य प्रान्तमुरसि करिणीं अभिन्नाम्
आरुह्य चापशरतोमरशक्तिधारी,
सद्यः पुरन्दरपुराद् बहिरन्वधावत् ॥

+ श्वःश्रेयसं श्रेयो मम स्याच्छ्वसीयः श्रेयसः ५।४। अ० इत्य
* ईशानदिशम् + हस्तिनो वमथुः करशीकरः ।

दूरेण राजकरिणीमवलोक्य वेगा—
द्गत्वाध्वनैव चलतीं वणिजं त्वरेति ।
देवी तथैव निशिताङ्कुशपाणिरेव,
ओजाय पुरन्दरपविश्च निवारिणं त्वम् ।।

अन्येद्युरपि द्विजपतेरपरं समुद्रं,
विन्दे विशत्कणितेषु दिशान्तरेषु ।
देवीवशा परिश्रमाक्षगतिप्रमाणा,
तस्थावतर्कितमचिञ्जयतिप्रभावः ।।

भूपे समीपमभिसर्पति कान्दिशीकौ,
तौ सान्द्रभित्तु वनमेकमपश्यतां द्वौ ।
तस्मिन्निलीयतुरनूपतले श्वसन्तौ,
स्वप्राणरक्षणपरायणतां प्रपन्नौ ।

कान्तारकान्तरगतावपि तत्करेणु—
मालक्ष्य मार्गपतितां स विचार्य भूपः ।
तौ मार्गितुं झटिति हस्तिपकेन सार्धं,
त्यक्त्वा विशां वहिकरगाहनमन्तरंगम् ।

भूपं विचिन्वति धरा वणिजा सहैव,
निष्क्रम्य राजकरणीमधिरुह्य वीरा ।

क्षत्रियः, कन्नोजनगराद् ब्राह्मणेभ्योऽपहितैः द्रव्यैश्च वहिर्निर्वासितः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पौरन्दरीं दिशश्चमहूपतिरागरक्ता-
सन्हाय विस्मयपराय पुनः प्रतस्थे ॥

अल्पीयसैव समयेन वने समस्ते,
राजा तयोरनुपलभ्य पदन्निराशः।
यावच्चिकीर्षति पुनः पुनरेव गन्तुं,
तावद्दशामनवलोक्य निजाल्पपात ॥

निद्राणसारथमिदं करिणीं समैवा-
रुह्य प्रयाणमनयोः परिणामकष्टम्।
हा भागधेय! विपिने किमिदं प्रपन्नं,
राजाऽऽलपन्निति शशाप निषादिनं स्वम्

गेहं प्रयाहि सचिवान कथयेतिवृत्तं,
नानाचराभि विषयानह्मातदास्मि।
तद्धेनुकां+नय पुरं यदि ते मनीषा
सैषा चलेत्परिश्रमाप्तगतिः स्व एव ॥

एवं तदैवमनुशास्य पुरन्दरोऽपि,
पौरन्दरीं हरितमेव पदा प्रतस्थे।
देवः प्रमाणमिति भूपवियोगदुःखा-
न्मन्दं रुदन् स समयेन पुरं स्वमेव ॥

❀ पूर्वदिशम्। ❀ करिणीम् + हस्तिनीं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजाऽनवाप्य तदुदन्तमथातिरोषा-
त्केयूरहारवसनानि विसृज्य शान्तम् ।
दण्डी कमण्डलुधरः स बभूव भूयो,
बभ्राम च क्षितितलेऽबुधवत्प्रबुद्धः ॥

देवी तदीयवशया नगरं समृद्धं,
सायं समागमदनेकमणिप्रकाशम् ।
तत्रैकमन्धकरिपोर्भवनं प्रविश्य,
क्षिप्रं शिवं शिवकरं प्रणनाम भक्त्या ॥

बन्धुं बुभुक्षुमियमालपदाशु देवी,
विश्रम्यतां क्षणमहं विपणिं व्रजामि ।
विक्रीय रत्नमथ तस्य धनेन धान्यं,
मूलं फलं सकलमेव समानयिष्ये ॥

निद्रालुरस्मि भगिनि ! त्वमपि श्रमार्ता,
विश्राममाश्रय समस्तमिदम्प्रभाते ।
इत्यूचिवांसमपि तं वणिजं विहाय,
देवी ययौ विपणिमेव विधेर्विधानात् ॥

एकेन तत्रिशि मणिक्रयिकेण देवी,
दृष्टै तदीयमणिना कपटादवेदि ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कोटी: षडर्हति अखिलं नअस्ति गेहे,
सार्कं मया चल पुरे वसु ते यथोक्तम् ।

अद्वि भ्रुवं करपदं वयसा युवत्वं,
तस्याः स्वरूपमतिगौरमयं विलोक्य ।
कुर्भावभावितमना अशरीरवाणी-
र्विद्धो धरां निशि निनाय निकेतनं स्वम् ॥

शय्यालये मम धनं यदनन्तमेत-
त्पश्यांगने ! शयनमारुह निर्विशङ्कम् ।
पातुन्तवाधरसुधां यतते मनो मे,
संगेन शाम्य मनोभवहव्यवाहम् ॥

धीराऽकरोन्मनसि सिंहमुखात्प्रमुक्तं,
गोमायुरिच्छति जनं स विधेर्विलासः ।
क्वाहंवणिक् क्व च नृपःसमयोऽपि रात्रे
रारात्खलोऽयमिति सा मधुरन्तमूचे ॥

दिष्ट्या तवाभिलषितां स्मरसुन्दरास्य
शय्यां शशांकधवलामहमाश्रयेऽपि ।
आकण्ठमुन्नतिकरं सुरतस्य पूर्वं,
मद्यं पिबाव इति यत्प्रथमं व्रतं मे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हृष्टेन तेन मधुरं मधुपीतमुक्ता,
देवी पिबेति तदनुप्रजहास सोच्चैः ।
रिक्तं मुखस्य सविधे चषकन्नयन्ती,
गन्धेन तस्य मधुनो वमती मुमूर्च्छ ॥

शुश्रूषुरस्मि तव नाम, भुजङ्गनाम्ना,
गोत्रं वदस्व, सखि ! कश्यपगोत्रजन्मा ।
श्रीमन् ! पिबैकचषकं, वनिते ! कृतम्मे
कस्मादलम्पिब पिबेत्यकरोद्विमूढम् ॥

अद्यं वसन्तसफलं विलपन्तमेनं,
कुड्ये *पतन्तमपहाय निशीथकाले ।
रथ्यामशिश्रयदियं धृतिमात्रमित्रा,
गन्तुं शिवस्य सदनम्मदनान्तकस्य ॥

आरुह्य कोऽपि जवनं तुरगं तदानीं,
रात्रौ पुरस्य विचरन्यवनोऽवनाय ।
तेजस्तिरस्कृतसुधांशुमिमां विलोक्य,
स्थाने कुरङ्गनयनाहरणं स मेने ॥

बाले ! समारुह तुरङ्गमिह भ्रमन्ती,
पादाम्बरैकशरणे ! पथि नो बिभेषि ।

---

* भित्तौ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धं ततो हि कुलदाऽसि यथेच्छमर्थं,
धाता बलादपि नये सदनं भवन्तीम् ॥

तां यावनीमिति गिरं सहसा निशम्य
स्नेहाद्विदातिविदुषी तमथावभाषे ।
का वा न कज्जलगिरेः सहजं भवन्तं,
वामा वृणीत यवनेश ! परं व्रतम्मे ॥

मांसाशिनस्तव विशेयमहन्न गेहं,
साकम्मया विहर काननपर्वतेषु ।
सप्ताहसंगमपि ते न च संस्पृशेयं,
पश्चात्तवाभिलषितं परिपूरयेयम् ॥

वाचं तथा समभिनन्दति पापभावे,
देवी तुरङ्गमधिरुह्य तदा तदीयम् ।
पूर्वां दिशं प्रचलतिस्म स चान्वधाव-
त्तामेव मत्तकरिणीमिव सारमेयः ॥

एवं दिनत्रयमगाद्दिवसे चतुर्थे,
चिन्तातुरा जडमिमं विपिने जिहासुः
जम्बालक्ष्मच्छजलसंप्लुतमुत्तरेण,
सा पौरुषं समवलोक्य तमादिदेश ॥

* पक्षम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चित्तं मम स्पृहयते विपिने द्रुमेभ्यः,
पारेजलात्तरुवरात्त्वमुपाहरेह ।
कौपीनमेव परिधत्स्व जलेन यस्मा-
त्क्लिन्नानि सर्ववसनानि न ते भवन्तु ॥

श्यामसून किमु सुमानि शुभे ! त्वदर्थे
वाचं वदन्निति पटच्चर*वेष्टितांगः ।
पङ्कं विवेश जलभावनया स मूढ-
आकण्ठमग्नमवलोक्य धरा तुतोष ॥

योषेति मंजुरिति रेफ*जनोपरोधः,
प्राप्तः प्रभूततम इत्यवधार्य देवी ।
तस्यैव शाटवसनैः पुरुषायिताऽभू-
त्तूर्ष्णेन पश्यति जने निरगादुदीचीम् ॥

कालेन कामद्रुमिति प्रथितं पुरं तां,
प्राप्तां निशम्य सचिवात्पुरराडनङ्गः ।
आहूय सादरमवोचदिमां महात्मन् !
मध्येसभं कथय कोऽसि युवा सुरूपः ॥

एषा तमाह समधीतसमस्तविद्यं,
मां शूरबाहुजतनूजमवेहि राजन् ।

* जीर्णवस्त्रम् । * अधमः ।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्नाशनी पुरुषवर्यसुमोहनौ ते
एवं मया गदितमस्तु वृथा व्रजामि ॥

राजा तमाह वस राज्यमिदं प्रशाधि
जामातृतां भज कलां परिणीय कन्याम् ॥
पुत्रो न मे विधिवशाद् दुहितापि चैका
गेहागतं नरवरं कथमुत्सृजेयम् ॥

देवी कलापतिरभूज्जयजीवशब्दैः,
तोष्टूयमानमहिमा समयेन तत्र ।
शय्यालये रहसि मोहन एष पत्नी-
माश्लिष्य साश्रुनयनः स्फुटमाचचक्षे ॥

बाले ! कले ! कृतमतित्रपया नवोढा,
वोढारमात्मचरितैर्वहिरङ्गकैः ।
सन्तापयत्यतितरां सुखयत्यहो न —
लोकोत्तरं प्रथमसङ्गमनं तरुण्याः ॥

सा मोदते दिवि चिरं वनिता सुकीर्तिः,
काले ययाऽतिविषमेऽपि मनस्य दोषाः ।
नोच्चारिताः स्वपतिदेवतया द्वितीये,
साध्वीपथं परमदुस्तरमाश्रुतायाः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वृत्तं समेत्यमिति सुस्फुटमात्मसत्वं,
सर्वं जगाद भगिनीभिव सा कलान्ताम् ।
छे अव्ययम् नमुचिसूदनवज्रपात-
भिन्नो इव प्रपततां तपनीयतल्पात् ॥

तातो हि घातमकरोदविचारकर्मा,
किं भागधेयमुदितं मम दुर्भगायाः ।
इत्थं तदा विलपतीं वचनैः कलां ता-
माश्वासयद्रहसि सा पुरुहूतपत्नी ॥

तातो हठात्तव समोपयमं विदध्यौ
त्वां बंधुना किल कले ! मम योजयिष्ये ।
वृत्तं सुगुप्तमिदमस्तु न चेदनङ्गः
कन्यैकजीवनफलः शमनातिथिः स्यात्

बाला कला कुलवती पितरावपीद-
न्नाचष्ट मोहनमसेवत निर्विशङ्कम् ।
पुंवेषभाजमपि राजकबन्धमेनं
मेने जनः पितरमिन्द्रमिवामरौघः ॥

तेनावनौ नगरमेत्य समार्थिवांछाः,
पूर्णा भवेयुरिति घोषितमुच्चवाचैः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आयान्ति यांति मधुपा इव पद्ममध्ये
राजानमर्थिनिवहाः परिपूर्णकामाः ॥

सिंहावलोकनमथो स वणिक् प्रभाते,
देवीं पुरे मृगयते न परं तदाप्तिः।
जातं किमेतदिति सोऽपि विचार्य भूत्वा
पाराशरी*भुवि चचार विचारसारः॥

मद्येन मोहितमतौ मयि या निशीथे
चंडा पलाय्य मधुरं वदती जगाम।
तत्प्राप्तये प्रयतनं मम मुख्यकर्म-
स्येवं प्रलप्य विचचार भुवं भुजङ्गः+॥

आकण्ठकुण्ठिततनोर्यवनस्य पंके,
दीनां गिरं निशि निशम्य दयालुरेकः।
पान्थः प्रयत्नचतुरस्तमथोज्जहार
कौपीनभागयमपि भ्रमतिस्म भूमौ॥

श्रीमत्पुरन्दरपतेः सचिवाश्च पौरा,
भूपस्य देशगमनं वत हस्तिपालात्।
श्रुत्वा विचुक्रुशुरहो धरया वरेशः
प्रव्राजितः स्वविषयादिति दुःखभाजः॥

* सन्यासी + कुटिलो भोगी वा कामी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कालेन कामदपुरं प्रथितं पृथिव्यां,
विश्रामसद्म नियतन्ननु याचकानाम् ।
प्राप प्रपामिव पिपासुरदीनसत्त्वः
पूर्वं पुरंदरपतिर्मुनिवेषधारी ॥

श्रीसोढुनावनिपतेरनुशासनेन,
प्रातः पुरो भवति याचकसार्थ* एषः ।
राजा विलेखयति नाम पुरं च तेषां
पश्चाद्धनेन बसनैस्तनुतेऽतितुष्टान् ॥

अन्येद्युरेव द्युतिमतामिव नाथमेकं
धाराधरान्तरगतं सहसा ज्वलंतम् ।
प्राप्तं वनीपकगणे सहसाऽवलोक्य,
राजा मुमोह तमुवाच विचार्य किंचित् ॥

तत्त्वेन नः कथय कोऽसि तवाभिधा का
भ्राजिष्णुतेयमतुला न च मार्गणेषु ।
पादद्वयीकोकनदकोमलताऽपहार—
लब्धातिरागमपि कस्य न संशयाय ॥

अर्थी तमाह धरणीश ! विधेर्विधाना-
च्चित्रं न किंचिदिह पूर्वभवेहि भूपम् ।

* सङ्घः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीमत्पुरन्दर इति प्रथितं धरेशं,
कालेन केवलजटाजिनदण्डवित्तम् ॥

दैवेऽथवा विपतिषत्यभियोगसिद्धिः
कूले यथा तदर्विनिष्ठितपादपानाम् ।
छायाय हेतुरपरन्न फलं जनानां,
श्रीमन्नरेश ! यतनं यशसे तथैव ॥

श्रीमत्पुरंदरपतेरिति दीनवाच्चं,
राजा निशम्य सचिवानिदमादिदेश ।
सौधं नवं नयत भूपतिनिर्विशेषं,
संभावयध्वमिममर्थिनमाविसर्गम् ॥

सौधे सुधांशुधवले निवसन् प्रधानैः,
संपूजितः स्वनगरे स्वजनैरिवायम् ।
दण्डाजिनादिमुनिचिन्हमथापहाय,
राजा पुरंदरपतिः स्वगतम्बभाषे ॥

किं मोहनस्य महतीक्षयदियं मदीयं,
वृत्तं समासकथितं मनसा विभाव्य ।
पातारमात्मज इवात्मपतिं द्वितीया,
मां सेवते सततमेष दयाऽवतारः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुतस्य रूपमसकृत्परिपीतमेव,
तैलक्षयेण अवलोक्य स्वयमाप्नुवानम् ।
तेन स्मरे क च कदेति वदेय स्वालि,
मात्रप्रिया मम परं पुरुषत्वमेतुः ॥

श्रीशौरिणो न च जरा ननु तूबरस्य +
तौते भवत्यपि पदं मम संशयस्य ।
अस्त्यत्र सैव पतुषाग्निशिखाम्बुदाय,
स्वस्पूजनं तदपि किं विविधाद्यभाति ॥

नीतैकमाग्रयमतापिति चित्तयाते,
श्रीमत्पुरंदरपती दिवसे द्वितीये ।
प्राप्तौ शुभक्षणयनौ सहसैव देव्यौ,
श्रीपद्मनाभमिव तम्मुखकैश्यभाजौ ॥

प्रातर्यथानियमसर्वजनावलोके,
जाते सदर्शनचतुरगादिव मोहनस्तौ ।
पताननौ निगडबद्धपदौ विधाय,
कारागृहे तमपि पातयतेश्य प्रांशत ॥

अन्येद्युरेव भगिनीस्य पुरातिथिः श्री-
दामोदरस्य सततं शुभनाम गायन् ।

+ श्मश्रुस्थानसमेतोऽपि सः पुरुषः श्मश्रुरहितः स तूबरः 'तुवरो-ऽश्मश्रुपुरुषे' इति मेदिनीकोशः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तं मोहनः सुचरितं प्रणनाम भक्त्या
प्रावेशयच्च निलयं निजमेव सद्यः ॥

अस्तङ्गते सवितरि क्षणमेकतानं,
श्रीचक्रपाणिभजने वणिजं विविक्ते ।
आसाद्य सादरमवोचदयं महात्मन्
शुश्रूषुरस्मि तव नाम पुरं चरित्रम् ॥

सत्यं सतां व्रतमिति स्वचरित्रमेषः,
पूर्णं प्रभाष्य वरयोपकृतं मयीति ।
यत्कामकोपमुखशात्रवसानुबन्धी
संसारबन्धमपहाय हरिं प्रपन्नः ॥

एतावदात्मचरितं स निगद्य शश्व-
द्भिःस्वस्य विश्वपतये क्षणमास शान्तः ।
श्रीमोहनस्य च मनः समभिद्य शोकः,
प्रादुर्बभूव निजबन्धुगतिं विलोक्य ॥

तत्पादपद्मभिपीड्य करद्वयेन,
राजा सकम्पमवदद्वणिजे सुगांधो !
श्रीमन् क्षमस्व भगिनी तवसर्वभावैः
मां विद्धि मोहनपदामधुना वरां ते

देवीं वराङ्गनृपपदेन निजस्वसारं,
ज्ञात्वा वणिक्कुतुकतः परमं तुतोष ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आचष्ट सा च सकलं स्वमुदं समस्मै
राजागमं च नरसौधनिवासवृत्तम् ॥

देवी यदा निशि विवेश ततः सुशुभ्रं
सौधं पुरंदरपतेरभिसारिकेव ।
निद्रालसः खलु समीक्ष्य समागतं तं
भूपं ससंभ्रमसबोधवद्भो ययौ तत् ॥

तं मोहनः समवदन्नृपतेऽतिखर्यं,
वृत्तं निजं वद यदेव विरागहेतुः
राजा स्वराज्यमपहाय पलाय्य याति,
ख्याता जनं कमुपयातु निजवनाय ॥

राजाऽपिसाग्रमतिविस्मयहेतुमस्मै
श्रीमोहनाय चरितंनिजमाशशंस ।
अन्ते रुदन् भुवि पतन्भवतः स्वरूपं
अप्रेयसीसमसहो कथमित्यभाषीत् ॥

पत्युर्वशीकरणमेव न तद् व्रतं य-
द्देवी समाचरति वाक्यमिदं हि मूलम्
विश्वस्य यत्र भवता विधुता सती सा
भ्रान्ताः पुरंदरपते ! विपदोऽपि घोराः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एके भवन्ति सचिवा अपि भूपवार्ते
सम्मात्परीक्ष्य वचनं नियतं खलानाम्

राजाऽऽदरेण फलकर्मविचारचञ्चुः
सर्वत्रहेय सकलाऽपि च राजनीतिः

श्रीमत्पुरन्दरपते ! चतुर्भिरितोऽग्नि-
बिम्बं वहन्निव अयं च समेयतेऽसौ ।
यत्रैष तं स्वविजयाय च कामदं के-
तुः प्रयाति विजयेन निजायुधेन ॥

एवं यदन्नरपते एतस्य कारागारा
सर्वं घटेत पुनरेतदिति व्यशास्त्वाम् ।
मोमोहनः समधिगम्य हृदय कलार्ये
पुत्रं यदभ्यधिकितहेतुमया निमग्नो ॥

कालेन कामदपुरं प्रभुना दुरात्मा,
दूतेन चाक्रमथ वर्तितशो प्रयानः ।
तत्क्षोभनः परिषदि प्रतिपिन्य कोपा-
दूचे पुरन्दरपतावपि विद्यमाने ॥

यन्मुर्वशीकरणकर्मे पुरन्दराणी,
नैव मयं चरति दुष्ट ! यदन्ततेवम्
अत्र प्रभावमपि किं कथयेद् नोचे
द्रवढं दुरन्तमुपभु इव निरर्गलोकः

हृतरकामदं तदपि च कुपति कुमारकं,
श्रीमे रवकर्मवादिवाक्यमथ दुरात्मा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्यं सद्गुरुसम्प्रदाय तमदिश्नं
देवीकृते पतिवशीकरणापवादः ॥

यार्त्तां तदेति सचिवस्य निशम्य रोषा
त्तं कुन्तुमञ्चकरेण पुरःप्रवेशात् ।
यंसाल राजहतक ! अपया विहीन
शिष्यस्य ते वधमिह प्रकुरुसेऽद्य नाम्

देवी यदा प्रियतमामवदत् स्वपत्यै
राज्यं सुखं निजजनानमवञ्च भिक्षुः ।
सुतं वदन्तमपि तस्य वधाय यान्तं
श्रीमोहनो हि निहसन्नृपतिं न्यषेधत् ॥

श्रीमोहनः पुरुषवेषमथापहाय
सौधं विवेश सहसाऽधिपतिं ननाम ।
आश्लिष्य गाढमथ सन्नृपतिश्च जाये
श्रीसद्गुरुस्त्वकृपाकर्षविरक्षितस्ते ॥

देवी यदाऽपि पतिपादसमाश्रिताऽमू—
दानन्दसागरगतेव तनः स्वकीयम् ।
सर्वं शरीरं चार्पितं नयिषः कृपार्त्ता,
तस्मै गुरुप्रवचनादिममर्पं च रात्रौ ॥

आशमिते ! मम प्रमानममोधपावं
शिष्यस्य ह्यवचनेषु ममाऽपराधम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्यालपन्त्वमसि मोहनभूमिपाल
इत्थं हसन्सह तया प्रथमं स रेमे ॥

अन्येद्युरेव वणिजं स्वसखायमेषः
श्रीमान्पुरन्दरपतिः प्रणमन्तमाह ।
संरक्षितं नृपकुलं विशदा च कीर्तिः,
सम्पादिता सखिवर ! क्षम मेऽपराधम् ॥

देवी धराऽथ वणिजे निजबन्धवे ताः
प्रादात्कलामपि च कामदपूःसमृद्धिम् ।
दुष्टौ भुजङ्गयवनौ सचिवं च मत्त
साऽपातयत्तमसि यावदसुप्रमोक्षः

।

कालेन कामदपुराद् गतवान्नियुक्तः,
श्रीमान्पुरन्दरपतिः सपरिग्रहोऽयम् ॥
आमन्त्र्य मित्रवरमात्मपुरं प्रविश्य
रेमे चिरं दिवि पुरन्दरवज्जयश्रीः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भीष्मत्यागः

१ — स्मृते भीष्मेऽधृष्ये स्मरणपथमारोहति क्षः
भगानां राजासावुदधिनिवहश्चातिगहनः ।
नयागारापातो क्षः भुवनगुरुगांभीर्यभरितः
पृथुः प्रांशुर्देवालयसुविलसद्गोपुरगणः ॥

२ — महान् धर्मो वीरः प्रसर मम वाण्यस्य नुतये
विचित्रं यस्यासीज्जननमिह चिन्तानभिगतम् ।
प्रतिज्ञावैचित्र्यं प्रथितमवनौ यस्य दिवि च
त्रिलोकीचित्रं तद्वधचरितमत्राथ कथय ॥

३ — प्रयत्ने कंसारेः प्रशमनविधौ नीरसफले
प्रवृत्तिस्संरब्धा समरहरणाय द्रुततरम् ।
कुरूणामाध्यद्ये कुलतिलकभीष्मश्च निहितो
धृतोऽहं हन्यां नावददिति वरान् पाण्डुतनयान् ॥

४ — युयुत्सूनां व्राता रणभुवि समेता उभयतः
समं प्रातर्नेतृप्रवरकुरुवृद्धेन झटिति ।
तथैव व्यूढाश्च द्रुपदसुतवीराग्रमणिना
निदेशं चाकाङ्क्षन् प्रहरणममी दातुमतुलम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५ — तदानुक्त्वा किंचित् सरभसमगाद्धर्मतनुजो
ध्वजानाद्धर्म यः कृतहृदमतिर्भीष्मशिबिरम् ।
निहन्तुः शस्त्राणां जयविलसदानाकयशसो
वधोपायं धर्मिन् प्रवद तव नत्वेत्यकथयत् ॥

६ — अबोधद्भीष्मस्तं सदयहृदयो वत्स ! समरे
पुनर्मामागच्छेति चलतु रणं तत्र जयवान् ।
सुतः पाण्डोरेवं च निगदितवाञ्छन्तनुभवः
समर्थ वीराणां प्रबलकुरुशल्यं किल वधः ॥

७ — जगत्यां चारित्रप्रथितपुरुषाः केऽपि विदिताः
चरित्रे कस्यापि ... ।
वरं ... तनुतया
प्रदीप्तो ... केयमनयोः ॥

८ — ...निवं ...त्युवां ...नयति न भेदं कृतधियां
सदा ये धन्यास्तु प्रसितमनसः कर्मततिषु ।
तथापीयं भिन्ना व्यवहरणरीतिः खलु तयोः
वरः पक्षः स्वो वेति परिगणना यत्र बुधयोः ॥

९ — भटानामाघट्टस्तदनु चलितो वेगघटितः
प्रवृत्तं ...प्रकटमतिभीमं प्रमथनम् ।
भरत् भीष्मशरालं निचय इव संख्ये च तद्धितां
बभासे तेजस्वी प्रलयसमयं स्माकलयति ॥

* नगरापातः — अमेरिकायां विद्यमानो विख्यातो जलप्रपातः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१० — अहान्यष्टावेवं तुमुलतरमायोधनमभूत
क्रमाद् भागोभूयान्निधनमगमत्पाण्डवबले ।
अथान्येद्युर्धर्मश्चकितचकितौ भ्रमद्धृदयौ
ययौ सान्नस्तूर्णं गुणवरगगांगेयसविधम् ॥

११ — प्रणम्यपरनर भवान्यावदजितं
बभत्यैतच्छत्रं मम किल न तावज्जयमतिः ।
समायाता विद्वंस्तव हननवेला कथय मा-
मुपायं सद्यस्त्वं समयहरणं मा कुरु विभो ॥

१२ — अवादीस्त्वं सत्यं भरति मयि शस्त्रं गुणनिधे
प्रहर्तुं शक्तो मां न भवति पुमान् कोऽपि जगति ।
निगद्यैवं भीष्मः तृणमिव स चिन्तालुरभव-
द्यदि स्यादन्तो मे निहतमिह दुर्योधनबलम् ॥

१३ — कथं कुर्यामेतां विदितविषयः पक्षविहतिं
परित्याज्यो लोके विरहितगुणस्स्वोऽपि पुरुषः ।
परो ग्राह्यश्शिष्टस्स यदि गुणवान्नैजकुलजो
विशिष्याराध्यश्चेति किल विदुषां तिष्ठति मतम् ॥

१४ — मयैतावन्तं वै समयमुषितं कौरवगृहे
ऋणं तद् व्यावृत्तं युधि विविधसेवावितारणात्
करिष्येहं साधोर्गुरुविपदि साहाय्यम
प्रकारं हन्तुं मां कथयितुमिदानीं व्यवसितः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१५ — विनिश्चित्यैवं द्राक्कुरुजरठ ऊचे नृपसुतं
चरित्रं मे पूर्वं विदितमखिलानां शुभमते ।
निजाभीष्टं साम्बा मयि गुरुमुखेनालभत न
असाध्याऽलब्धाथ त्रिपुरहरमस्तोकतपसा-

१६ — वरं सा हन्तुं मां तदनु च विवेशानलमिद्धं
समुद्भूता भूयो द्रुपदतनुजा सा स्मृतियुता ।
ततस्स्थूणाकर्णात्समधिगतपुंस्त्वाऽद्य च पुमान्
शिखण्डीत्यस्याख्या निगदितमिदं देवमुनिना ॥

१७ — तदार्षंकार्यं सद्यश्शपथमसुमात्मान्तरिति च
स्त्रियं वा स्त्रीपूर्वं प्रति युधि न युध्येय रिपुहन् ।
शिखण्डी स्त्रीपूर्वस्तमिममधुना वीरविजयः
पुरोधायाजौ मां त्वरितमपशङ्कं प्रहरतु ॥

८—महात्यागी धर्मव्रतपरिवृढो धर्मजलधि-
र्बंहो धर्मग्रन्थैर्भवति किल छेत्ता स्थितम ।
जनित्वा धर्मेणानुपहतधृतिर्जीवति
मृतिं चानेनासाद्युपदिशति धर्मिव्रतमिदम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विचारवीचिः

१

महीरुहैः कोमलवल्लिकाभिः,
सस्यैः प्रभूतैश्च मनोभिरामे ।
ग्रामे कश्चिज्जीर्णगृहे कुलीनो,
युवावसत्कोपि महादरिद्रः ॥

२

गेहान्तरे वैद्युतभूरिदीपैः,
प्रशोभिते ज्वालितवर्त्तिकेव ।
महाधनैरत्र विगण्यमानो-
ऽप्यसावजीवत्सुखमात्मशुद्ध्या ॥

३

अनेकधास्यां भुवि जायमानैः,
स्वजीवितक्लेशगणैस्समार्तः ।
कदाचिदेवं विवशो निराशो,
ह्यचिन्तयन्नक्तमसौ विनिद्रः ॥

४

मनोरमं भूतलमत्युदारं,
सुखं विभातं विभवैश्च पूर्णम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भोगाननेकाननुभोक्तुमस्मा-
न्न शक्यतेऽन्यत्र शरीरवद्भिः ॥

५

शैलाः समुद्राश्च सरोवराश्च,
नद्यः शुभाः मोहनपुष्पवाट्यः ।
महाम्बरं तारगणैः प्रसन्नं,
चन्द्रो रविश्चात्र विभान्ति लोके ॥

६

किञ्चात्र गायन्ति कलं विहङ्गा-
श्चरन्ति नैके पशवः सहर्षाः ।
आमोदवाही पवनश्च वाती-
त्येतच्च सर्वं हि मुदे नराणाम् ॥

७

इदं हि युक्तं धनिकस्य शून्य-
मित्येव पश्येदखिलं दरिद्रः ।
वृथैव मे जन्म, यतः प्रपञ्चे,
नग्नस्य नास्मिन् रमते मनो मे ॥

८

दारिद्र्यमित्येतदहो गरीयः,
शापान्तरं दुःसहमेव मन्ये ।
कश्चिन्न रक्षां हि तनोति किन्तु
सर्वेऽपि निन्दन्ति च निर्विशङ्कम् ॥

९

महानिकृष्टस्तृणसन्निभोऽयं
गुणैर्विहीनः खलु मूढ एव ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं विचार्यान्यजनो दरिद्रं
समीपमायान्तमहो जहाति ॥

१०

स्नेहेन यः पूर्वमवर्ततासौ
नायाति, यद्येमि न चेक्षते मां ।
पृच्छामि चेन्नास्ति तदुत्तरञ्च
क्लिष्टा दशा निःस्वजनस्य लोके ॥

११

यथानुकूलं न फलन्ति कर्मा-
ण्यहो हतेनात्र मया कृतानि ।
अतस्तु कार्यक्षमता गता त-
त्स्थाने निराशापि समागता मे ॥

१२

जन्मान्तरे किन्नु महापराधः
कृतो मया वेद्मि न किञ्चिदेषः ।
सर्वा रजन्यः शिवरात्रयो मे
भवन्ति चिन्ताकुलमानसस्य ॥

१३

कदापि यस्मो तनुरोऽत्र सौख्य-
मेलद्वयाहं किल मर्त्यजन्म ।
इदन्तु पुण्यैर्लभते हि जन्तु-
रित्युच्यते मादृशजन्मना किं ॥

१४

कष्टं ! परेषामपहासवाचो
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
निशम्य यज्जीवति कश्चिदत्र ।

ततोऽपि मृत्योः पुरतः स्वकी
जीवार्पणं काम्यतरन्तु ॥

१५

अन्योद्यमेनैव पदं समुच्चं
सम्प्राप्यमिष्टं सुखमश्नुवन्तः ।
जना अनाथं हतभाग्यमेनं
कदापि दूनं नतु चिन्तयन्ति ॥

१६

यथाविधानां महतां कटाक्षाः
वाच्यश्च रूक्षाः तडिता समानाः ।
तेष्वस्ति भव्यं प्रचुरञ्च, पुंस्त्री-
भिन्नं हि ततःकोपि सहेत नान्यः

१७

कदापि किञ्चिन्न वचोपि धन्याः
प्रमादिनस्ते कृपया वदन्ति ।
स्थिरा न लक्ष्मीः स्वयमन्यमेषा
भजेच्चिरेणेति च नो स्मरन्ति ॥

१८

हा ! निर्धनत्वे निरये द्वितीये
बद्धेन्द्रियः सन्नवशः स्थितोऽहं ।
भूयोपि नालं नियतं मनुष्य-
जन्मार्थचिंतामपि कर्तुमुर्व्याम् ॥

१९

मात्रापि भक्तिःस्वतयाधुनाहं
स्मरोऽस्मि कार्पण्यवशंवदस्यात् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मन:शरीरे कृशतां च यातो-
वीतक्रमं याति मृतिश्च बुद्धिम् ॥

२०

बाल्ये तु सर्वं तु मनोज्ञवाटं
महीतलञ्चेति विचार आसीत् ।
किन्त्वद्य काचिल्लतिकापि तस्मि-
न्न कल्पसे पुष्पवती मुदे मे ॥

२१

ह्यस्तदा जातकुतूहलानां
विहङ्गमानां कलगीतिघोषः ।
उदारपीयूषसरिन्महोर्मि—
लीलारसं मे हृदये व्यकार्षीत् ॥

२२

किञ्चाभवन्ये तु रसालपोताः
अह्निक्रमं सोढुमपारयन्तः ।
सर्वेऽपि ते सम्प्रति वानदेश-
माक्रम्य रम्याः फलिनश्च भान्ति ॥

२३

यदा विहारेष्वपि ये सखायो
हर्षाकुलाः, तेऽद्य च हर्षवन्तः,
अहन्तु दूनो नितरामिदानीं
भाग्यं विभाव्यं च नृणामवार्यम् ॥

२४

कदा नु भव्यानि भवन्ति भूयो-
व्यस्तः परं वै भुवि [illegible] ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतीक्ष्यमाणोऽप्यनवेक्ष्य कालः
प्रयाति मां, किञ्च वयोऽपि याति

२५

पूर्णो न मर्त्यस्तु विनात्र दारै-
रित्युक्तिरन्यूनपदार्हिकैव ।
इदं विचार्याहमुदूढहर्षं
पर्यग्रहं काञ्चन कोमलाङ्गीम् ॥

२६

पाणिग्रहेणाथ मदीयकौल्य-
स्थितेरभूत् कोपि विपर्ययश्च ।
अचित्ततः स्नेहमहो गताभूत
क्लिष्टा दशा मामदुनोच्च कामम् ॥

२७

मनोरथान् पूरयितुं प्रियायाः
यतेस्म नक्तन्दिवभासमार्तः ।
तथा तरुण्या त्वचिराद् व्यगर्ह्यं
नैर्धन्यतस्तेन परं व्यषीदम् ॥

२७

रम्यैर्वचोभी रसनिर्भरैश्च
सन्तर्पयन्तो मम बान्धवास्तु ।
त्यजन्ति यावद्विदयाः यथा माम्
तथा निकृष्टां पदवीं गतोऽस्मि ॥

२८

आशाप्रवाहैरभिताड्यमानो
[illegible] ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विना विरोधं झषदंशनेभ्यः
कथं शरीरं भुवि धारयामि ॥

३०

बुद्धिर्न युक्ता, नच कापि वृत्तिः।
दया न चान्येषु, न मित्रता च।
नोल्लासि चित्तं नहि जीविताशा
निःस्वस्य भारायत एव देहः।

३१

दयाविहीने धरणीतलेऽस्मि-
न्नाजीवितान्तं मृतकल्प एषः।
एनं शरीरं प्रियमात्मनोऽपि
वोढुं कथञ्चिन्न हि पारयामि ॥

३२

हा हा विदीर्णस्फटिकस्य कश्चि-
द्दूरीकृतः खण्ड इवात्र वस्तुम्।
यथा हतस्यापि न मे लघीयान्
दुर्पस्तथा मामसृजद्विधाता ॥

३३

ज्ञानेन लब्धेन नचावदातं
चित्तं मदीयं परिपूर्णतश्च।
तस्मान्नराणां स्थितिभेदचिन्ता-
जालेन कामं विवशीकृतोऽस्मि ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३४

ततो दयार्द्रोऽय वराभयं मे
दातुं प्रगल्भः किल मृत्युरेकः
मदीयबन्धुः नहि कश्चनान्यः
तदन्तिकं केन पथा व्रजेयम् ॥

३५

ननु मदीयां मृतिपावकाग्नि
स्वयं हि तुच्छाः शलभा इवात्र
पतन्ति तत्स्यादिति चिन्तया न
मुह्यामि, दूनोऽपि न भीरुरेषः ॥

३६

मृत्युं प्रतीक्ष्यात्र शरीरमेतत्
कालं कियन्तं भुवि धारयेयम् ।
अतः परं बान्धवमित्रवर्गै-
र्विना विपन्नो हतभाग्य एषः ॥

३७

पितामहः कश्चन मर्त्यमेव-
माजीवितान्तं विहतं विधातुम्
मूर्खो नु किं कोप्यनवेद्य कश्चि
द्धर्थं मनीषी कुरुते न यत्नम् ॥

३८

अस्यापि मे कृत्यमिहास्ति कश्चि
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
त्कृत्या अनया जननेन नूनम् ।

सम्यक् परं तत् पुनरद्य कर्तुं
प्रसीद मामस्तु कृतार्थता मे ॥

३७

एवं विचारशतनिर्दलितान्तरात्मा
नावैदसौ कनकमोहनरश्मिजालैः ।
भास्वानपास्य तिमिरं भुवनं व्यतानी-
दारम्यमित्यथ मुदा महता प्रबुद्धः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृथुकाहरणम्

पुरा कदाचिद् गतमत्सरः सुधी—
र्धरासुरः सद्मनि कान्तया वसन् ।
कुचेलनामा भगवत्प्रियः शमी,
निनाय कालं भगवद्विचिन्तया ॥

(२)

हरिप्रियोऽसावचलासुधाशनः
स्मरन्मुकुन्दस्य मुदा हृदा सदा ।
न वेद सान्दीपनिशिष्यसत्तमः,
कुटुम्बदारिद्र्यमगान्न याचितुम् ॥

(३)

सदाऽपि दारिद्र्यहुताशतापितं,
मुदा मुकुन्दैकविचिन्तनाग्रहम् ।
इमं कदाचिद् द्रविणार्दिनःस्पृहं,
समेत्य कान्ता गिरमेवमाह सा ॥

[४]

निशम्यतां नाथ ! निजाः कुमारकाः,
क्षुधाऽतिमात्रं परिपीडिताः सदा
रुदन्ति यत्तच्छ्रवणद्वयं तव,
प्रविष्टमन्तर्न शुचं तनोति किम् ॥

[५)

इयं प्रिया ते धनहीनतावशा—
दुपागतं सङ्कटमन्वहं सहे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथं सहिष्ये स्वसुतप्ररोदनं,
दिशाव ! नः साम्प्रतमोदनं त्विति ॥

(६)

कदापि मन्दस्मितकौमुदीयुताः,
स्फुरन्ति हा ! मे न सुताननेन्दवः ।
अतः सदैषा गृहिणी कुमुद्वती,
शुचा परीतेव विलोक्यते न किम् ?

(७)

सुवर्णभूषानिवहैरहं सुता—
निमानलंकर्तुमियं न कामये ।
दिने दिने क्षुद्विवशेषु सूनुषु,
प्रदातुमन्वः सकृदेव कामये ॥

(८)

हरिर्न जानाति हि तस्य सांप्रतं
जगन्नियन्तुर्मुरवैरिणः सखा ।
भवान् सतीर्थ्यः सह कान्तया सुतै-
र्वतेदृशं सङ्कटमाप्तवानिति ॥

(९)

यदि प्रभुर्वेत्ति भवन्तमीदृशं
सुतीव्रदारिद्र्यविपद्गतं हरिः ।
स ते धनं दास्यति भूरि गम्यतां,
विलोक्यतामाश्रितकल्पपादपः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(१०)

इति प्रियाभाषणचोदितो द्विजः,
प्रियाप्रदत्तान् पृथुकान् पटच्चरे ।
उपायनं माधवदर्शनोत्सुको,
वहन् प्रतस्थे भवनाच्छनैः शनैः ॥

(११)

असौ विशीर्णं निजयातपत्रस्तु—
ङ्कन्दं वसानो मलिनं पटच्चरम् ।
अघौघकान्तारहुताशनं हरे—
र्मुहुर्मुहुर्नामगणं जपन् ययौ ॥

(१२)

किमद्य दृष्ट्वा जगतीपतिं हरिं,
मुदं गमिष्याम्यहमच्युतः सखा ।
अतीत्थमेकं स्मरति प्रियं किमि—
त्यचिन्तयच्चेतसि भूसुरः पथि ॥

(१३)

विलंघिताध्वा धरणीसुरः पुरः,
पुरीं मुरारेर्विजितामरावतीम् ।
व्यलोकयद् द्वारवतीं मणिव्रज—
प्रकल्पनानासदनामनन्तराम् ॥

(१४)

प्रसूनसम्पादितगन्धमारुत—
प्रसाङ्गनाकम्पितकेतुपद्धिकाम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

समुद्रमध्ये जनदृष्टिगोचरां,
विनिर्मितां धामिव विश्वकर्मणा ॥

(१५)

अलैरगम्यामतितुङ्गगोपुरां
सुवर्णसालैः परिखाभिरावृताम् ।
अपवर्गशोभां सुकृती शनैः शनै—
रिलानिलिम्पः प्रविवेश तां पुरीम् ॥

(१६)

तृषाऽभिभूतस्य सुशीतलं जलं यथा
रुजार्तस्य यथौषधं हितम् ।
समस्ततापप्रशमैकभेषजं,
पुरं कुचेलस्य सुखं ततान तत् ॥

[१७

समागतं तं धरणीसुराग्रिमं,
विलोक्य सानन्दमुपेत्य सत्वरम् ।
करे गृहीत्वा स्मितभासुराननो,
निनाय शैय्यासदनं जगत्पतिः ॥

(१८)

सुधा मुकुन्देन चराचरात्मना,
समस्तपूज्येन तदाभिपूजितः ।
प्रहृष्टचितो रमया च वीजितो,
महीसुरः सादरमभ्यभावि सः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१९

द्विजातिभूषामुकुटीमणे ! भव-
त्समागतिः साम्प्रतमात्ममन्दिरात् ।
शुभैर्भवत्पादसरोजरेणुभि—
र्समाद्य धन्यं पुरमेतदावभौ ॥

(२०)

कुचेल ! ते दर्शनमद्य सम्भवे—
दिति स्वचित्ते न निरूपितं मया।
द्विजं भवन्तं सुहृदं विलोकय-
न्नहं कृतार्थोऽस्मि च भाग्यवानपि॥

(२१)

इदं जगत् स्थावरजङ्गमात्मकं
पुनाति येषां चरणोत्थितं रजः ।
द्विजन्मनामग्रिम ! दुर्लभं नृणां,
नमामि ते पादपयोरुहद्वयम् ॥

(२२)

गुरोः सकशाद् गतवान्भवान्प्रियं,
सतीर्थ्यमेतं स्मरतिस्म किं सकृत्।
अमेदमागः सपदं क्षमस्व हे
सखे न तत्रागतवानहं त्विति ॥

(२३)

सदाभवद्दर्शनलालसस्य मे,
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
दिनानि यातानि बहूनि हा ! वृथा ।

सदा वियुक्तस्य गुणांबुधेर्मनाङ्,
अथा न वार्त्ता भवतोऽवगम्यते ॥ ६

(२४)

अनारतं पावनमानसो भवान्,
धनादिनानाविभवेषु निःस्पृहः ।
अपि स्वकर्माणि फलेच्छया विना,
करोति सम्यक् प्रतिपाल्यरं गृहे ॥

(२५)

गुरोरनुज्ञामधिगम्य सत्वरं,
निजं समेत्यात्मसमानरूपिणीम् ।
प्रियां सुशीलां परिणीतवान्न किम् ?
वियोगतोऽद्यावधि कीदृशी कथा ॥

(२६)

अपि प्रिया रूपवती गुणान्विता,
न वा सुतान् सा सुषुवे मनोहरान् ।
स्मिताननास्ते कलभाषणादिभि—
र्मुदं वितन्वन्ति हृदन्तरे न किम् ॥

(२७)

सविस्तरं ब्रूहि कथां निजामिमां,
प्रियं वयस्यं वचनैर्नवैर्नवैः ।
त्वदीयवार्त्तामृतपानकालसं,
श्रुतीयकर्णद्वयमद्य मे सखे ! ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२८)

सुतैः स्वदारैः स्वगृहे सुखं वसन्,
भवानिदानीं गुरुसन्निधौ पुरा ।
सुदैव वत्स्याव इति स्मरन्किमु,
स्फुटं कथा सा किमु विस्मृताऽथवा ॥

(२९)

प्रमीलया मीलितदृक् स्वपन्नहं,
कदापि सान्दीपनिना प्रताडितः ।
कदुष्णमुच्चं नयनाद् यदश्रु त—
न्न वा सखे ! नूनमनेन पाणिना ॥

(३०)

गुरोः सतीं क्वापि गतामवेत्य स-
रपयोवटं शिक्यगतं विदारयन् ।
पिबन्मुषित्वा नवनीतमुत्तमं,
भवानसखे ! दूरमधावमेकदा ॥

(३१)

कुमारकाविन्धनमेत्य काननं,
युवामुभावाहरतं जवादिति ।
कदाचिदावां गुरुदारचोदितौ,
गतौ च सान्दिपनिसन्दिरोदरात् ॥

[३२]

पथून् शिशून् गोपकुमारकान् वन-
प्रयाणकाले प्रसमीक्ष्य हे सखे ! ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथा मयोक्ता व्रजवासिनः पुरा,
अमैव तावत्किमिहापि विस्मृता ॥
[३३]
शिवः समाभाषणलोलमानसौ,
परस्परावद्धकराञ्चलौ पथि ।
गतौ तदानीं द्रुमराजिराजितं,
व्यलोकयाव स्फुटमग्रतो वनम् ॥
[३४]
क्वचित्पुलिन्दीकलगानसुस्वरैः,
पिकादिनानाखगकूजनैः क्वचित् ।
क्वचित्सुमोद्भ्रान्तमधुव्रतारवै—
र्न किं तदासीत् अतिमोहनं वनम् ॥
[३५]
सुगन्धवाताम्बुविहङ्गनिस्वनै—
र्वनं सुमैः पक्वफलैश्च तत्क्षणात् ।
द्विजं भवन्तं समुपागतं च मां,
तदा न किं सम्यगुपाचरत् सखे ! ॥
[३६]
सुरम्यकल्पैर्विविधैः सुगन्धिभिः,
सुमैरनल्पैर्वनमस्फुरत्तदा ।
सतीत्थं ! हे मित्रमणे ! स्फुटाधुना,
विचित्रतारैरिव विस्तृतं वियत् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[३७]

प्रफुल्लपङ्केरुहजालसुन्दरं,
वनान्तलक्ष्मीमुकुरप्रभं सरः ।
वने तदानीं नयनायनं गतं,
सहस्रचन्द्रं शरदम्बरं यथा ॥

[३८]

क्वचित्तदानीं मृगयाविशारदान्,
भयङ्करान् चापकरान् विलोकितान् ।
वनेचरान्ताननुचिन्त्य मे सखे
भयादिदानीमपि वेपते मनः ॥

(३९)

वनान्तमासाद्य करेण सञ्चितं,
लतादिनद्धं गुरुदारुसञ्चयम् ।
यदा वहन्तौ शिरसि प्रभाकर—
स्तदा न किं चिन्तय पश्चिमामगात् ॥

[४०]

अनेकवर्णाम्बरमोहनाकृतिः,
सुरक्तकान्तारुणकल्पितप्रभा ।
दिनान्तसन्ध्यानुगता च वारुणी,
विलासिनी नौ हृदयं जहार सा ॥

[४१]

नगा नगा भास्करभास्वरप्रभा—
सुवर्णकोटीरविराजिमस्तकाः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदा सखे ! भूसुरकाननस्थयो-

र्द्वशोरकुर्वन्न किमात्रयोर्मुदम् ॥

[४२]

क्वचिन्निधाय द्रुतमिन्धनं नदीं,

समीपगामेत्य कृताप्लवावुभौ ।

अकुर्व सान्ध्यं नियमं तदा हे-

कुचेल ! चित्ते प्रतिभाति किं तव ॥

(४३)

दिनान्तसूर्यातपतप्तकाञ्चन-

द्रवाङ्कितामुस्तटिनी स्वकर्मणा ।

न केवलं नावपि कं समीपगं,

सुशान्ततापं न चकार सा तदा ॥

(४४)

तरङ्गपारिप्लवमीनलोचना,

मरालिका मन्दगतिर्निजं पतिम्

समीक्षितुं कोशसमुन्नतस्तनी,

जगाम वामेव वने न सा सरित् ॥

(४५)

वरानिलिम्पोत्तम ! मां भवन्तम-

प्युभौ नदीतीगरताविमौ तदा ।

शनैः शनैः सायमवीजयन्न किं

सुमावली सौरभमोहनो मरुत् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(४६)

तदासनः सान्ध्यवनान्तसारुतो,
यथाऽभवन्मे सुखदायकस्तथा ।
अयं न वायुर्मणिकङ्कणोज्ज्वल—
प्रियाभुजान्दोलिततालवृन्तजः ॥

(४७)

वलक्षभा भुग्नमतीवसुन्दरं,
तनूरुहाङ्कं निटिले वधानया ।
नवासमापल्लवपाटलाभया,
बभार सन्ध्या शशिनं नवं तदा ॥

(४८)

नदीतटे सायमुपागतान् पुरा,
जटाधरान् शान्तहृदन्तरान्मुनीन् ।
तरङ्गमन्दानिललोलसंकुच—
त्सरोजसंभ्रान्तमधुव्रतोत्करान् ॥

(४९)

स्ववासभूरुड्वरकोटरागतान्,
खगाननेकान् कलनादसंयुतान् ।
अलिव्रजापातचलत्सुमावली—
सुगन्धरम्याणि लतागृहाणि च ॥

[५०]

तटस्थवृक्षाग्रसमीरपातित—
प्रसूनमालासुभगं च सैकतम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चराचरप्रीतिविधानलब्धस—
यशःप्रसं वारि च तत्सरिद्गतम् ॥

[५१]

विशालनेत्रान् हरिणीसमन्वितान्,
मृगान् सपोतान् तदभूमिशायिनः ।
समीक्ष्य रोमन्थविराजिताननान्,
मुदं गतं मानसमावयोर्न किम् ॥

(५२)

तदा वियत्सौधगतागतक्रिया—
विशालसोपानसमानदर्शनान्
उपर्युपर्यम्बरसीम्नि सङ्गतान्,
घनानिदानीमपि नौ मनः सखे ! ॥

(५३)

ततः समन्तात्तमसावृते वने,
पुरा सखे ! हा !! श्रुतसिंहगर्जनम् ।
इमं कथन्तं सदयं यदब्रवीत्,
भवान् तदद्यापि न विस्मृतं मया ॥

(५४)

तदा कठोरस्तनिताट्टहासिनी
चलत्तडिद्दर्शिततिग्मदंष्ट्रिका ।
तमःसमाच्छादितलोकलोचना,
पिशाचिकेवाविरभून्निशा वने ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(५५)

प्रचण्डवाताहतिकम्पिते वने,
घने भृशं वर्षति घोरनिःस्वने।
सदाऽभविष्यद्यदि नो भवान्भिया,
स नूनमत्यक्ष्यमहं स्वजीवितम् ॥

[५६]

परस्पराश्लिष्टशरीरयोर्द्वयो—
स्तरोरधस्तात्स्थितिमावयोस्तदा।
सखे! कथं विस्मृतवानयं भवे—
त्कुतामिदानीमिव चिन्तयामि सतत् ॥

(५७)

अकालजीमूतविमुक्तपीवर—
व्यथाप्रदाशःकणताडितौ मुहुः।
इतस्ततः काननसंभ्रमातुरौ,
कथञ्चिदावामनयाव तां निशाम् ॥

[५८]

ततः सखे! भूसुर! पूर्वपर्वतं
समागतो बालदिवाकरश्च सः।
प्रभातवेलाऽपि कथं नु वर्ण्यते
मया न कश्चित्कविरस्मि सूक्ष्मदृक् ॥

(५९)

निशाविनाशे सति हर्षमाप सा,
सरोजिनी शोकमगात्कुमुद्वती।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुखं यथैकत्र परत्र दुःखमि—
त्युदाहृतं सर्वचराचरैरपि ॥

(६०)

पुरस्फुरत्पद्मसमूहनिर्गता—
नलोनपश्याव रविप्रभामिमा।
द्रुतं समुत्थाय कुतोऽपि गच्छतो,
गवह्वपाच्चिसतमःकणानिव ॥

(६१)

दिनागमे मर्कटकैस्ततस्तत—
स्तदा कृतं तोयकणातपाश्रितम्।
स्मराधुना तन्तुगृहोत्करं वने,
सुवर्तुलं चापमिवैन्द्रमुद्गतम् ॥

(६२)

मणिप्रभैर्बालरविप्रकाशितै—
द्रुमोच्चलत्सर्वदलाग्रलम्बिभिः।
पयःकणैः काननमाबभौ तदा,
निशिप्रभूतैरुडुभिर्यथा नभः ॥

(६३)

मनाक् प्रशान्ते जलदे दिनागमे,
वनाद्वहन्तौ शनकैस्तदिन्धनम्।
गतौ विचिन्वन्तमिमं भवन्तम-
प्युभावश्याव गुरुं समीपगम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(६४)

पितेव पुत्रौ निजदर्शनोत्सुकौ,
चिराद्वियुक्तौ करुणार्द्रमानसः ।
गुरुर्महर्षिः शरणं वनात्तदा,
निनाय मां त्वामपि शिष्यसत्तमम् ॥

(६५)

गुरुर्द्वैव सान्दीपनिना कृताशिषा,
महर्षिणा तेन समं गृहं गतौ ।
प्रियेण मित्रेण कथा तथाविधा,
पुरातनी सम्प्रति चिन्त्यते न किम् ?

(६६)

गुरोर्महर्षेर्यदुवाच सा सती,
प्रिया दयापूरितमानसा तदा ।
तदद्य चित्ते मम भाति भूसुर-
प्रवीण ! सर्वं किमु विस्मृतं त्वया

(६७)

कुचेल ! सान्दीपनिवासवासजं,
गतं न लभ्येत सुखं पुरातनम् ।
इतीव दूये नितरामहं पुन-
र्नितान्तचिन्ताकलुषीकृताशयः ॥

[६८]

[illegible]। यदीयसन्दर्शनमात्मनिर्वृतिं,
तनोति चित्तं च समाहितं नृणाम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अक्रम..मँकरतं मनस्विनं
स्मरामि तं पूज्यपदं गुरुं सदा ॥

[६६]

ह्रर्द समस्तेषु चराचरेषु यः,
सुखं हृदन्तेन समं समीक्षते ।
विपाटिताज्ञानमनर्घतेजसं,
नमामि तं पूज्यपदं सदा गुरुम् ॥

[७०]

प्रदातुमस्मै भवता गृहाण किं,
किमप्युपानीतमिति ब्रुवन्हरिः ।
शनैर्जहारास्य धरासुरस्य त-
द्विशीर्णवस्त्राञ्चलमग्नपाणिना ॥

[७१]

इति द्विज कृष्णमुखाब्जनिर्गतां,
सुधामयीं सादरसूक्तिकौमुदीम् ।
निपीय संतृप्तिमवाप वा न वा,
स्मितं मुखे दर्शयतिस्म केवलम् ॥

[७२]

तुषैः समेतान् पृथुकान् सतण्डुलान्
कथं ददामीति विचिन्तयन्निव ।
महीसुरेन्द्रस्त्रपया नताननो,
न दत्तवान् प्राभृतमच्युताय सः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[७३]

सखे! सुहृन्मौलिमणे! द्विजोत्तम!

त्वदीयहस्ते किमिदं वदन्निति।

स्वयं हरिर्नम्रमुखस्य वाससः

सकृद् गृहीत्वा पृथुकानभक्षयत्॥

[७४]

द्वितीयां मुष्टिमादाय मुकुन्देन समुद्धृतम्

करं जग्राह मामेति तावत्सत्वरमिन्दिरा।

पृथुकाहरणं कृष्ण! कृतमेतद् द्विजन्मनः

समस्तैश्वर्यजनकं कुचेलस्याभवद् गृहे॥

[७५]

धरासुरसमाहृतान् पृथुकतण्डुलान् माधवः

करेण सकृदाहरन्मुदमवाप भुक्त्वा स्वयम्

द्विजोऽपि मुदितो हरिं सहजया च भक्त्या भृशं

स्तुवन्स्वभवनं गतः सुखमुवास दारैः सुतैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कलाषोडशचन्द्रिका

क्वाहमल्पमतिः क्वेयं वर्णना गुणवारिधेः ।
कल्पते ते कृपा राम ! मयि नित्यानपायिनी ॥

मुख्यो धर्मः प्रथित इह यद्धाम दिव्यं विहाय ,
तुच्छे भावे भ्रमणसहजे मानुषीं योनिमायन् ।
विश्वाह्लादैर्निरुपमगुणैर्मातरं सुप्रजां सः,
कुर्वन् जज्ञेऽर्ककुलजलधेः पूर्णचन्द्रोऽकलङ्कः ॥

मधुरमधुरलोकैर्मञ्जुलाक्रन्दनैश्च ;
अभिनवमधुहासैस्तोषयन्मातृवृन्दम् ।
गुरुवरमुपचर्यावाप्तसर्वास्त्रशास्त्रो ,
व्यतत यजनरक्षां ताटकादीन्निहन्ता ॥

गाधेः सूनुश्चरितयजनो राममाबुद्ध्य भौमीं ,
नेतुं लोलो जनकनगरीं रामचन्द्रेण यायात् ।
मार्गे रथ्यां दृषदमगमत्पादपद्मेन रामः ,
सद्यस्तस्माद् युवतिरमला रामपादं प्रपेदे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नीत्वाऽहल्यां शपनविधुतां गौतमेनागतेन,
प्रापुस्तस्माज्जनकनगरीं मैथिलेनार्चितास्ते।
राजास्थाने नृपतिनिवहे पौरलोकानुकीर्णे,
पेशं रामो धनुषमकरोत्कर्णपर्यन्तमाशु॥

भग्नो दर्पः नृपतिविततौ संशयो जानकीजः,
दूतानीता दशरथयुता बान्धवाः सर्वदिग्भ्यः।
विद्युद्दीप्ते विमलमणिभिः भासुरे मण्डपे स्वां,
शून्यापायां प्रियसहचरीं जानकीमग्रहीत्सः॥

सीतामोदं प्राप्य मद्वीकसारं,
पीत्वा रामः स्वां पुरीं प्रस्थितः सन्।
मध्येमार्गं भीषणाद् रुद्रशिष्यात्,
नैजं तेजः प्राप्य भूम्ना रराजे॥

मन्दं मन्दं चलति पवने सारयूशैत्यसंगे,
पद्मामोदिन्युपवनलतामण्डपे घर्मकाले।
वर्षे शीते धरणिभवने शारदे जानकीष्टः,
रामो रेमे परिणतशरच्चन्द्रिकाधौतहर्म्ये॥

विश्वामोदं पुत्रमालोक्य योग्यं,
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
राज्यं दातुं संमीयाय राजा।

कैकेय्यास्तैर्दत्तै राज्यमस्यै,
कृत्वा भौम्या काननं प्राप रामः ॥

अथ पुत्रपरायणो नृपः प्रययौ स्वर्गमतीवदुःखितः ॥
भरताय रघूत्तमः पदे शरणं सर्वजनस्य संददौ ॥

चित्रकूटमधिगत्य ससीतः मौनिवर्यनुतिभी रघुपुत्रः ।
दण्डकामुपजगाम समेतुं स्वाश्रयैकनिरतान्मुनिवर्यान् ॥

मोहनरूपं मञ्जुलगात्रं राघवमेत्यानन्यजविद्धा ।
शूर्पणखेयं रामनिकारे राक्षससैन्यं नाशमनैषीत् ॥

नल्गुलंघनमरालविषाणं चारुदेहनिभमोहनदेहम् ।
लोलभीचकितसुन्दरदृष्टिं जानकी मृगमवेक्ष्य ववार ॥

मारीचोऽथं राममानीय दूरं ;
सीतानन्ताश्रस्मरद्वै कृपालुः ।
एतत् श्रुत्वा लक्ष्मणं प्रेष्य सीता ;
शूर्पागुल्यग्राग्रजेनाहृताभूत् ॥

तस्मादागत्य रामो द्विजविततिपतिं न्यस्य दिव्ये पदेसः ।
ह्यात्मालोके सतृष्णां शबरिकुलवशं तोष्य कान्तः प्रियां वा ॥
भव्याज्ञाबद्धभक्तेर्विंयदुदयसुतान्प्राप्य सुग्रीवमैत्री—
मैन्द्रिं हत्वा कपिं तं पवनजमकरोज्जानकीलोकनार्हम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सीतां ज्ञात्वा कपीशै रघुकुलतिलकोऽवाप्य लंकां सरोषः ।
तत्रायान्तं दशास्ये विमुखशुभगुणं सोदरं प्राप्य रक्षाम् ।
हत्वा नीत्वा सपत्नान् दशमुखसहितान् धाम दिव्यं स्वकीयं,
साभिप्रायेण सीतां हुतवहनिहितां प्राप्य हार्दी बभासे ॥

लङ्कारत्नकपीसपार्वनिसजैः कौबेरयानेन सः
प्राप्य स्वीयपुरीं विनिद्रभरतामायोज्य संज्ञां पुनः ।
केन्द्रोमेशमहर्षिमन्त्रियुवतीवाराभिषिक्तो मुदा,
रामो रक्षतु मां नतावनरतो रामोर्जितांको विभुः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ईरानदेवता

कदाचनाहं दिवसावसाने
दृष्टं निजं कंचन मित्रवर्यम् ।
स्वैरं वसन्तं स्वगृहे पुरेऽन्ये
तेहरीअभि प्रस्थितवान् सुखेन ॥

२

नीत्वा गृहे तस्य च नातिदीर्घं
कालं तदाहं विषयेषु कुर्वन् ।
संभाषणं तेषु च तेषु पश्चा
दभ्यवर्तयं स्वां वसतिं समेतुम् ।

३

अथारुहं किंचनं वाहनं च
लोहोमयं सर्वजनाय गन्तुम् ।
आयोजितं यच्च दिवापि रात्रौ
पुरात्पुरं याति सदा क्रमेण ॥

४

मार्गस्य मध्ये विजनप्रदेशे
तमोनिगूढे युवती च काचित् ।
एकाकिनी वाहनमेतदध्या—
रोह [illegible] ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५

आगो निशाया गत एव दीर्घ-
स्ततो न पान्था बहवो बभूवुः ।
स्थानानि भूरीण्यनधिष्ठितानि
शून्यान्यपश्यंस च वाहनेऽस्मिन् ।

६

तथापि साऽभ्येत्य शनैः सधैर्यं
मत्पार्श्वदेशे निषसाद तन्वी ।
अगल्भभावातिमनोहराङ्गी
यूनां मनश्चालयितुं समर्था ॥

७

निमेषमात्रं परिरभ्य मौनं
पुनश्च याने चलति स्वयं सा ।
मुखं स्वकीयं परिवर्त्य मन्द-
मपातयन्मय्यवलोकनानि ॥

८

दृष्टा सकृत्पूर्वमितः कदापि
नासीन्मयेयं युवती तथापि ।
चिराय सुज्ञातमिवात्मनीन-
माप्लावयन्मां मधुरस्मितेन ॥

९

आलोकपाशेन विकर्षितोऽपि
तया स्मितैश्च प्रतिबोधितोऽपि ।
शोके तवाहं न निरीक्षितुं तां
सद्दीभवन् किं कर[illegible] ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०

अजायतास्याः हृदये मदीये
काचित्तदाण्या स्वजनत्वबुद्धिः ।
प्राग्जन्मसु स्यान्मम सा बहुभ्य
स्त्वकैतवस्य प्रणयस्य पात्रम् ॥

११

परीक्षया आङ्ग्लामप्युपेक्षा—
पूर्वं परिज्ञानजने हृद्यं तत् ।
अवेक्ष्यमौचित्यविरुद्धमेवं
सदाभवं किञ्चन तुभ्यमीर्ष्यः ॥

१२

स्वस्थेतरत्वं मनसो मदीयं
विलोक्य वात्सल्ययुतेव माता ।
प्रचक्रमे साथ शनैस्तदा मां
वक्तुं समाश्रित्य फरङ्गभाषाम् ॥

१३

जानाम्यहं कस्त्वमसीति सम्यक्
दृष्ट्वा त्वदीयं वदनं च साक्षात् ।
महान् प्रमोदो मम जायतेऽद्य
यथा प्रवासागतपुत्रवक्त्रम्

१४

वृत्तान्तपत्रेषु मयात्र चित्र—
च्छाया त्वदीयः बहुशोऽपि दृष्टा ।
ज्ञातस्तथा चागमनस्य हेतु—
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
रस्मिन् प्रदेशे तव पुण्यराशे ॥

१५

त्वद्भूमिरस्माकमियं च भूमिः
परस्परासक्तसहोदरी द्वे ।
यतोऽस्य साम्याद् भवतः, ततस्त्वां
ज्ञातिं स्वीयं गणयामि साधु ॥

१६

शङ्कान्यथा मद्विषये कदापि
मा भूत्तु पाश्चिम्यमनसि त्वदीये ।
त्वद्दासगेहं समुपेत्य चाशीत्
प्रष्टुं प्रतिमें कुशलानि सत्यम् ॥

१७

त्वद्देशजाता बहुधा जनाश्च
ज्ञानित्वमस्माकमिदं पुराणम् ।
आचारणं नैव परं विदन्ति
प्रायेण कालक्रमविस्मृतं तत् ॥

१८

उद्योग एषः प्रथमोऽस्य नूनं
सभास्ति सर्वैरभिनन्दनीयः ।
सर्वे न किं त्वस्य यथार्थमर्थं
जानीयुरेतत्खलु शोचनीयम् ॥

१९

आकृष्यते कर्मसु तेषु तेषु
वित्तस्य लोभेन जनो निकृष्टः ।
आकृष्यते तत्र धनं तथापि
भक्तेन सत्कर्मसु निस्पृहेण ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२०

नष्टा भवेयुर्ह्युषितवात्र
वासेन सौकर्यभयाश्च नूनम् ।
वित्तं न हीयेत यथोचितं ते
नियोजकैरित्यपि सत्यमेतत् ॥

२१

कृत्वे भवत्वस्य तव प्रतिष्ठा
भवेच्च सर्वं कुशलं क्रमेण ।
श्रेयः परं शाश्वतमार्जितं स्यात्
स्वस्यानुरूपं न चिरेण नूनम् ॥

२२

अस्त्वत्र देशे निजदेशबुद्धि—
र्वयं च गण्याः स्वजनास्तवापि ।
अहं त्रिशिष्टैव सदा यतिष्ये
पुष्ट्यै च तुष्ट्यै च तवात्र वासे ॥

२३

अवेहि मां त्वत्कृतपाठनेषु
दिने दिने सन्निहितामिवैव ।
इतः प्रभृत्यत्र भवामि साक्षाद्
विद्यार्जने सावहिता यथान्ये ॥

२४

एवं तयोक्ते च विना विरामं
मया तु नैकोऽवसरोऽपि लब्धः ।
वक्तुं निजान् कानपि तां विशेषान्
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
सहैव नीतोऽपि सुदीर्घकाले ॥

२५

इत्थं प्रष्टुकामोऽद्य भवामि किञ्चि-
दित्येवमुक्ते मयि वाहनं तत् ।
मुक्त्वा तदा मन्दगति क्रमेण
कुत्रापि तस्थौ नगरोपकण्ठे ॥

२६

हस्तं मदीयं स्वकरे गृहीत्वा
शनैश्च सा सप्रणयं निपीड्य ।
'मयाऽवबुद्धं त्वरणीयमत्र
क्षमस्व माम्' इत्यथ मामवोचत् ॥

२७

उत्थाय पश्चात् स्वकरं मदंसे
निधाय 'यास्यद्य भवतानुज्ञा—
प्रदद्याऽस्मि भूयोऽप्यहमेवमुक्त्वा
सा निर्ययौ मामवलोकयन्ती ॥

२८

क्षणेन याने चलिते मया सा
कुत्रापि वीथ्यां तरुणी न दृष्टा ।
सर्वं तु मे स्वप्न इवावभासे
यत्तत्र वृत्तं निशि मार्गमध्ये ॥

२९

कुतो भवेदीदृशपाटवं मे
फरङ्गभाषामवगन्तुमेव ।
यस्यां पुराऽ[illegible]
मन्यावलोकैः परिशीलनं मे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३०

अपश्च बाला वयसा अवेणा
सुहृत्य नूनं मम भागिनेयी।
अवर्त्तितासीदुपदेशदाने
सुपक्वबुद्धिर्विदुषीव काचित् ॥

३१

सम्प्रपि यानादवरोहवेला
विना विलम्बं समुपस्थिताभूत्।
आश्चर्यसन्दर्भमिमञ्च सर्वं
गेहं यतोऽहं हृदि संकलय्य ॥

३२

यथा प्रविश्य त्वरया गृहान्तः
प्रज्वालितस्तत्र यदा च दीपः।
तदैव पत्रं शयने मदीये
निविष्टमेकं त्वरयाऽप्यपश्यम् ॥

३३

अस्तव्यस्तविन्यस्तलिपिं वहन्तीं
तां पत्रिकां मन्दतरे करे स्वे।
धृत्वात्र दृष्ट्वा लिखितं च पद्यं
तदाभवं कौतुकपूर्णचित्तः ॥

३४

'या दृष्टाद्य पथि त्वया
निशि तथा क्षौरं यया भाषितं,
चिन्ये नाऽमिह पारसीकघमुषा—
[illegible] मम।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आधातुं त्वदनुग्रहस्य तरुणी—
वेषं दधानां स्वयम्,
आत्युत्कर्षविवर्धनाय च
तव प्रत्यक्षभावं गताम्, ।

३६

आलोक्य पर्याप्तदमेनमगानुवीर्यं
वर्णांश्च मत्करकृतान्वरतुल्यरूपान्
आश्चर्यजालमपि मार्गगतं विचिन्त्य
त्वेतां हि केवलमहं शरणं प्रपन्नः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

को न कांक्षेत ?

कान्तां कन्यां कनकवसुभे को न कांक्षेद् वरण्यां,
विश्वामित्रोऽप्यहह! चकमे मेनकां नष्टतेजाः॥
विप्रोऽकांक्षत्कनकवलयं व्याघ्रहस्तेऽपि लग्नं,
लक्ष्मीकान्तोऽप्यवनिभवनोद् वामनो वा मनो नः॥

बाला लोला स्वरितगमने चक्रयाने निषण्णा,
चलद्वाराक्षिक्षुक्षितपथिकान् वारयन्ती पुरोगा
चित्तं तेषां रुचिरवदना भ्रामयन्त्यापाङ्गैः—
रेवं नूनां स्फुरितहसितैः किं न चेतोहरा स्यात्॥

किं नो न स्युः पठननिलये अन्तहासाभिरामा,
वेणीबद्धैः सुरभिकुसुमैर्गन्धमाघ्रापयन्त्यः।
मन्दं मन्दं रहसि च सखीः स्वैरमालापयन्त्यो
वामापाङ्गैः रतिपतिशरैश्चित्तमाकर्षयन्त्यः॥

क्रीडागारे प्रसृतपुलिने जालितान्तःपटाढ्ये
विद्युल्लास्यं तरुणाभिहतं कन्दुकं ताडयन्ती।
आयासोत्थं वदनकमले स्वेदमुन्मार्जयन्ती,
स्वाङ्गोद्भङ्गाद् गलितवसना चोदयेत् किन्न कामम्॥

मैत्री स्त्रीणां सपदि सुखदाऽप्यन्ततो दुःखदात्री
तां जानीथाः कटुफलसुरां सर्वथा वारणीयाम्।
विद्यापेक्षा यदि विसृज रे! मोहकं चारुवेषं,
मा माः स्वैरं सह युवतिभिर्विश्वविद्यालयेऽपि॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लोकगालिः

लोक ! त्वयापीदानीं तावद्वचमेतद्धृदयस्य अवधेहि ।
नालं त्वमसि अस्माद् विरम न रोचामहे तस्मै ॥

प्रेम्णो लास्यैर्मधुरान् रक्तान् दृष्ट्वापि सज्जनरमणीयान् ।
वाञ्छसि रक्तपरीतानपि रागस्य विपरीतान् ॥

कति न विनाशितवानसि सुन्दरसङ्कल्पमालिकाकलिकाः ।
ज्वालाध्यायन् यदि ता ननु भूरभविष्यत्परो नाकः ॥

कति न मरुं कृतवानसि जीवितवल्लिकाः सुमफलसङ्कलिताः
विपुलामोदाजनिकाः जीवन्मन्दहासकल्पलिताः ॥

प्रेम्णो मधुरसमेवं मांसे कलयन्नयि लोक ! आधुनिक ॥
कति न युगान् पश्चात्त्वमयासीस्तथापि मार्यासि किम् ॥

अन्यासहमानस्त्वं किमुतान्येषां पठस्यवश्येऽर्थे ।
वाचामपि निरवद्यां परमाहिंसापरैककथाम् ॥

स्वार्थान् पूरय, पूरय निःस्वार्थकथाविलोभनेन स्वम् ।
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
तावज्ज्वालामी नयमर्थान् पूर्णा समाप्य यावद् ॥

अभ्यर्थनम्

कालेनानेन दूना निजयमनियमान् विस्मृतीकृत्य नित्यम्।
मातर्विग्ना इमे ते चरणकमलयोः षट्पदीभूतचित्ताः।
नेत्रैः कारुण्यपूर्णैः सलिलकणभरैर्दीनदीना मुखं ते
पश्यन्तः प्रार्थयन्ते मुकुलकरयुगा दुर्जनैः पीड्यमानाः॥

भ्रान्तं कर्तव्यहीनं सकलजनगणं भूषयित्वा गुणौघैः
किञ्चास्य स्वान्तभाण्डाद् दुरितमलमहः पादधूल्या निरस्य।
भूगोलेऽस्मिन् समस्ते समविषमवरे भारते स्वीयदेशे,
स्थाप्यं दौर्जन्यशून्यं निखिलजनहितं रामराज्यं त्वयाऽम्ब॥

शुद्धं ब्रह्मैव तत्त्वं भवति भवजनिर्मोक्षिणे शङ्कराय
स्वातन्त्र्येणैव राष्ट्रं वहति परसुखं भाविने तच्छिवाय।
शक्तिर्या सर्वसिद्धिं व्यतरदतितरां कल्पनागम्यरूपा—
अस्माकं प्रीतये सा वितरतु हरये राष्ट्रकष्टापहां ताम्॥

विश्वज्ञो विश्वविश्वोद्भवभरणलयाधानमेको विभुर्यः
यस्य स्फूर्त्या समस्तं जडमपि भुवनं चेतनं वा बिभर्ति।
सोऽयं सर्वान्तरात्मा कथमपि जगतो यां विना कर्तुमीशो
न स्यात् [illegible] विष्णुपत्नी [illegible]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रमास्वागतम्

शाक्तमूलहरिणीतनुनेत्रां स्वर्णरूप्यसुमकल्पितमालाम् ।
हारिणीं कनकहीरसुवर्णां सन्निधापय इमां मयि देवीम् ॥ १
यत्र हेमचयरत्नसमृद्धिः नैच्छिकीतुरगसंततिलाभः ।
तां श्रियं सततमात्मसमेतां श्रीनिवासमयि वासय नित्यम् ॥ २
अश्वनिस्वनरथध्वनिभल्लाडम्बरैस्समवबोधितयाने ।
आह्वयेऽनन्तजन्तुकृपाब्धो त्वामुपेत्य मयि संवस भर्त्री ॥ ३
अब्जवासिनि कुशेशयवर्णे सून्मिषत्स्मितसमञ्चितवक्त्रे
आह्वये श्रितसुतोषिणि तुष्टे भर्मचेलरुचिरे कमले त्वाम्
सौम्यरूपभुवनसंस्तुतकीर्त्या भासुरे सुरनरार्चितपादे
ख्यातिनीश्वरि महोत्पलहस्ते संश्रयेऽस्मि मम नश्यतु गर्हा ५
देवि ते तपसि विश्वमहीजो जायतेऽत्र किल तस्य फलानि
त्वत्कटाक्षफलितानि च आयान्तु श्रियं मम हरन्त्वनभासे ॥ ६
कीर्तिसम्पदधिकोज्ज्वलराष्ट्रे प्रादुरस्मि मम देहि समृद्धिम् ।
येन कीर्तिशिवमन्त्रमणीनां संज्ञतिर्मम भवेदिह नूनम् ॥ ७
क्षुत्तृषाप्रकृतिमश्रियमग्र्यां नाशयामि भवदीक्षणधाम्ना ।
मद्गृहाद्धत निवारय मातः निर्ऋतिं कलिमवृद्धिमविद्याम्
पुष्पगर्भपरशीतलवात्या वीजितां वनमनोहरदेशाम् ।
आह्वये वसुमतीं शुभगन्धां दुस्सहां सफलसस्यमनोज्ञाम् ॥ ८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ईप्सितार्थततिसिद्धिसुतुष्टी पायसं सकलभोग्यविशेषान् ।
कीर्तिसाफल्य सम्पदुपेतां वाक्यसिद्धिमपि मार्थाये मह्यम् १०
कर्दमप्रपन्नाश्रितपङ्कव्यापिताखिलजगज्जननीक ।
सम्प्रजां मम कुले जननीं तां वासयाच्छसरसीरुहमालाम् ११
अम्भसेव किल कामनिदानं स्वम्भमप्यमृतपुंभवमापः ।
स्निग्धमन्नमुपयच्छत तस्मात् अन्यथस्त्वमपि मां विश मातः १२
क्षीरसागरसुधांशुसमाभां चारुहेमरुचिरां हरिदेव्याः ।
स्नापितां शरणमं बुजभूषां रुक्मिणीं मयि निवासय कृष्ण १३
शीतलां नवधिसद्गुणसिन्धुं वल्लरीमनुम न्तमणीदाम
हेमहारकलितां धृतवेत्रां धर्मिणीं मयि निवासय विष्णो ॥१४
यत्र रत्ननिधिहेमसमृद्धिः गोतुरगसुतसत्सुखलाभः ।
तां श्रियं सततमात्मसमेतां देवदेव मयि वासय कान्ताम् १५
राज्यलक्ष्मि, वरलक्ष्मि, गृहाण स्वस्य सुकुभवनस्ततु माम्
यः पठेदिह स वैभवभोगी भोगिशायिपदमेति च पश्चात् १६

मम काव्यम्

अखिलकवीनां गीतैरुपगीतस्यापि कौमलैः सततम् ॥
नूतनता मोन्मीलति तन्ये काव्यं मनोज्ञतमम्
नालंकारैरेतद् समलंक्रियते समस्तलोककृतैः ।
यद्यपि तदलंकारो राजति लोकस्य सकलस्य । २
संकल्पानां सीमनि चारुतराणां समुल्लसत्कलिका ।
काव्यं मम ...लसीति मधुमधुरम् । ३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कालिन्दिगगनविच्छिन्नो वीताभ्रश्च निश्चलस्तथा ।
सान्द्रो जीवस्तस्य हि सरसं तनुतेऽपि तन्निखिलम् । ४
आकाशेऽस्मिन्नीले ज्योत्स्नास्मेरे च तारकावलयः ।
परिवृत्य कलानाथं साक्षीकृतनिमीलनैः नयनैः । ५
गायन्ति यदा भावं संमोहनयाशु भाषया मधुरम्
लसति तदा मे काव्यं लोकान्तरभावमधुरतरम् । ६
मुदा यदा तालतरलाः पदन्यासात्सलीलकरवलयः ।
ललितविलासं लास्यं दर्शति च काव्यं तदा ललितम् । ७
माधवमाधुर्याभ्यां कुञ्जाभ्यां विराजमानायाम् ।
आमोदे निभृतानां पद्मपयोवीज्यमाने च ।। ८
वंशीवेणुनिनादे कले दिशान्तं स्पृशति हृदि लोले ।
नवपल्लवकरतले निलम्ब्यमाने च पवनेन ।। ९
नृत्यन्ती सानन्दं लतिकामाला कुसुमस्मयमाना
चलयन्ती वनमाला माद्यन्ती चेतनामाद्याम् ।। १०
लसति यदा मे काव्यं भावचमत्कारसुन्दरं सकलम् ।
वदति तदोत्तममेतत् शृङ्गारसाङ्कं किल प्रणयः ।। ११
व्यंजनया संमोहनमाकलितमधुरभावनारूपम् ।
जयति सदीयं काव्यं रमणीयार्थविशब्दमयम् ।१२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कवनकामिनीं प्रति

किन्तु विलम्ब एवं दयामसुषिमश्यि फलितुं भवती १
मम जीवितमोदमयि ! प्रीत्यास्मानञ्च लालयितुम्
कति नु दिनानतिदीनाननतनून् भवदे भावनाकमनः।
विनयानि प्रियभाविनि ! कथमेवं वार्थनैदमनाः २
अवलोकितुमयि हृदयं परस्परामेव नैकदा लग्निनम्
भावैरपि तन्मधुरैः तानि तानि लोलमालपितुम् ३
किमु नालभतावसरान् रमणीयान्मुग्धतालसानलसान्
अपि नेमानभिवाञ्छति पुनरपि भवतः सदा भवती ४
काञ्चनरुचिकमनीयं वसनमदो वसाना विभातमनु
कुसुमसुमन्दस्मेरा रचयन्ती चेतनामोदम् ५
कल्लोलानतिलोलांश्च रागस्य नवप्रवालकोमलयोः
सरलान् कलयन्ती तान् कपोलयो रागरञ्जितयोः ६
आश्लिष्यन्ती मन्दं स्पन्दमानचारुतुङ्गहृदयतला
शीतललमितं पवनं लीलयात्तसुरभिकुसुमवनम् ७
अनुदिनमेवं भवती समुपेत्य पुरो मदालसागमना
मम च किमर्थमकस्मात्प्रत्याश एव तिरोभवति ८
पुलकाञ्चितकायेऽस्मिन्नाश्लेषसमुत्सुकेऽतिलघु भवती
सुललितमेवं ... किञ्चिल्लज्जितपदा ! ९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मिकस्रग्मुग्धविलासप्रसरद्वीचीषु लीयते किमुत
मानसञ्जीनापि नवा जानाति ममामुकं भावम् । १०
मधुरसत्तामायान्ती मधुरवासनासङ्ग मानसकुमे
सततोल्लसिता जीवितनवोन्मेषशालिनी भवती ११
सीमातीतं मोहनमनुकलमुपचीयमानरमणीयम्
भावं दधतमपीमं किं कविमाशङ्कते दयिते ! १२
दिनमनु सायं साकं कमनीयाकाशकान्तिभिः सखिभिः
मां किं प्रतिपालयति न तथानुपमरागिणा भवती १३
सम्युपसरति प्रेम्णा कवनकामिनि सा तव कपोलतली
तरला कवितां गायति नो किं भावस्य सरलस्य १४
आरादपयाति रवौ रजनी समुपेत्य चञ्चलाह्वयति
यद्यपि तरसा भवतीं चिरलब्धसमागमोत्पुलकाम् १५
निस्सीम किल रागः चलितुं विवशं समुद्यतां भवतीम्
कतिचिन्निमिषानपि किं नाययते मे तथा पुरतः १६।
मय्यनुके साकूतं व्यावृत्य शनैस्सुधांशुचारुमुखम्
सुतरलतारान्नयनादाकलितो लीलया लोलः १७
प्रणयसुधारसलोलुपमयि मामकजीवमेवमुन्मनसम्
किन्नाश्लिष्यति मधुरं सिञ्चति सततञ्च पीयूषम् । १८
उत्कण्ठयते चेतो नैमिषिकस्ते वियोगलेशोऽपि
क्षेन विधीयेत तावकमदकलविलासज्योत्स्नायाम् । १९
स्थलकमलिन्या सुषमां परिमलधाराञ्च मादिकां सततम्
मधुरतरञ्च मरन्दं कलयन्ती किञ्चिदुपलीना २०
भावविलोलमपीमं श्लिष्यन्त्यपि लोचनेन रमणीयम्
कस्मादयि दयितुं मयि विलंघते जीवमोदमयि ! २१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फिर्दौसिः

अथोत्तरस्यां दिशि पारसीकेष्वेकः खोरासानितिराष्ट्रखण्डः ।
पुरा चरित्रप्रथितो धरायां भात्यद्वितीयो निलयो रमायाः ॥
ग्रामोऽपि तत्रामितभूतिधाम विराजते कश्चन तूसनामा ।
विद्वज्जनैरध्युषितो गुणाढ्यैर्नापीङ्कितः पापलवैः कदाचित् ॥
ग्रामे च तस्मिन्नतिपुण्यशाली विद्यानिधिः कश्चिदहृम्मदाख्यः ।
संमानितो ग्रामजनैरशेषैश्चक्रे निवासं निजधर्मपत्न्या ॥
कालक्रमेणाथ तयोर्बभूव पुत्रोऽपि कश्चिद्धिषणाम्बुराशिः
तातानुरूपः स्वगुणैरनेकैर्मूर्तः कुलस्येव च पुण्यपूरः ॥
"अबू'ततश्चाल्कसिमेतदासीद्धसन्—परं तातकृतं स्वनाम ।
येनैव बाल्ये विदितः कुले स्वे ग्रामे तथा स्वेऽपि च सज्जनानाम् ॥
सदा कवीनां वरदोऽसि नूनमेवं यशो भावि जगत्प्रसिद्धम् ।
संसूच्य तेनापरमप्युपात्तं स्वं नाम फर्दौसिरितीव भाति ॥
बाल्ये स्थितस्यापि वयस्यनन्यसामान्यमेकं हृदये पुपोष ।
औत्सुक्यमस्य, स्ववशे विधातुं साहित्यपूर्णां निजदेश्यभाषाः ॥
अधीतविद्यः स मतिं चकार कालं समस्तं विनियोक्तुमेव ।
साहित्यसंपूर्तिकृते स्वकीयं वित्ताद्यनावर्जितचित्तवृत्तिः ॥
पुराचरित्रं निजपारसीकराज्यस्य संपादयितुं निबद्धम् ।
काव्यात्मना सम्यगनश्वरं च महान्तमुद्योगमुपाददे सः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राज्यं तदा गज्नविंशजातः पृथ्वीपतिः कोऽपि महम्मदाख्यः
शशास सर्वं निजबाहुवीर्यपराजिताशेषनृपालवृन्दः ॥
आक्रान्तवान् भारतवर्षमेष महम्मदो गज्नविवंश्यभूपः ॥
प्रक्षोभयन् द्वादशवारमेतदस्मच्चरित्रे च बहुप्रसिद्धम्
चतुःशतं तेन नृपेण मानिता विरेजुरास्थानकविप्रवीराः
इति प्रवादः प्रचलत्यजस्रमद्यापि देशेऽत्र हि पारसीके
एकैकपादद्वयमस्य काव्ये संभाव्यते त्वेकदिनारनाम्नः ।
विरास्थ दानेन परं प्रतिज्ञामेवं नृपालः कवये चकार ॥
त्रिंशन्मितैर्भूरि परिश्रमेण संवत्सरैः प्रापितवान् समाप्तिम् ।
काव्यं स्वकीयं निजपारसीकवाण्यां च फर्दोसिकविः क्रमेण ॥
पूर्णं चरित्रं च पुराणकालादारभ्य काव्ये कविनाभ्यवर्णि ।
आस्वीयकालं पृथिवीं शशासुर्यदा नृपा गज्नविवंशजाताः ॥
तस्मिन् नृपाले च महम्मदाख्ये प्रदर्शयिष्यन् निजभक्तिपूरम् ।
शानाम इत्यस्य सुनाम कृत्वा तन्नामलक्ष्म व्यतनोत् स काव्यम् ।
नृपस्तु दीनारसहस्रषष्टिं प्रतिश्रुतं हेममयं विहाय ।
आदात्तदानीं रजतात्मवित्तं तत्संख्ययास्मै दहराभिधानम् ॥
इत्थं महीपालकृतः प्रतिज्ञाभङ्गस्तदा रोषविषादभारम् ।
अचिन्तितः पूर्वमसह्यमेव महाकवेर्हृद्युदपादयच्च ॥
लब्धं ततो गर्ह्यमनर्हवित्तं स्वयं सुराजीविमुखेषु सम्यक् ।
वैदेशिगेहे निवसत्सु केष्वप्यसौ जनेषु व्यभजत्तदानीम् ॥
काव्यं ततः किंचन भूमिपालधिक्कारगर्भं विरचय्य मन्दम्
अज्ञात एवान्यजनैर्नगर्या उद्विग्नचित्तो निशि निर्ययौ सः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्रान्तरे सोऽपि हरातनामपुर्यां निवासं निभृतं चकार
संवत्सरान् कांश्चिदलक्षितोऽन्यैः कालक्रमेणात्र जहौ स्व देहम् ॥
पश्चान्नृपालोऽपि कवौ स्ववृत्तिं विचिन्त्य संतप्तमना बभूव
दीनारवित्तं निजदूतहस्ते संप्रेषयामास च दातुमस्मै ॥

यदा च पुर्या मृतदेहमस्य द्वाराद्बहिर्नीतमभूत्तदैव ।
संभावनावित्तममुष्य दातुं समागतं तत्र विधेर्नियोगात् ॥

तज्जन्मस्थलतूसनामनगरान्नातीवदूरे व्यया ।
द्वित्तस्यापि महत्तरस्य न चिरात् श्रेयोऽनुरूपं कवेः
रम्यस्मारकमेकमस्ति सुजनैः सन्मन्दिरं निर्मितं ॥
याता यस्य सहस्रवर्षपरिपूर्त्युद्घोषवेलाऽधुना ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ईराने पण्डितः

— ❀❀❀❀❀ —

विराजते भारतवर्षदेशा—
द्देशं विशालं दिशि पश्चिमस्याम्।
पुरोणकालेष्वपि पारसीक—
नाम्ना यदासीद्विदितं धरायाम् ॥

रूपान्तरं केवलमार्यशब्द—
स्यास्त्यस्य नामान्यदिराणितीदम्।
सांस्कारिकं द्योतयते यदार्या—
वर्त्तेन सारूप्यमजस्तमस्य ॥

अपुष्यतां स्निग्धसहोदरीव—
मिथः प्रपुष्टप्रणयादरे द्वे।
आध्यात्मिकी लौकिकरूपिणी च,
विद्या च लक्ष्मीरिह भूविभागे ॥

भ्राता कनीयानपि वेदराशे—
र्ग्रन्थोऽपरः कश्चिदवस्तनामा।
सनातनोऽस्मिन् सरथुष्ट्रधर्मा—
चार्य्योपदेशोऽजनि पुण्यदेशे ॥

आदिर्षरो, दयु रथ क्युरुश्चे—
त्येवं विधैर्विश्रुतनामधेयैः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आसन् नृपाला बहवोऽत्र युक्ता
देशान्तरोद्गापितकीर्तिपूराः ॥
उद्यक्तवन्तो बहुशो गरीक्—
देश्या जयायास्य धरातलस्य ।
पराजिताः किन्तु पलायिताश्च,
वीरैः सदा तेऽपि च पारसीकैः ॥
देशेऽखिले योऽपि च सिन्धुदेश—
स्यास्त्यन्तरा मध्यधराम्बुधेश्च ।
आसन जगद्विश्रुतपारसीक—
राजाधिराजाः किल सार्वभौमाः ॥
काले गते कोऽपि गरीक्देश्यो
दैवादलक्सन्तरनामधेयः ।
आक्रम्य राज्यं विपुलं विजित्य
पिपेष तन्मूलपुरीं मनोज्ञाम् ॥
पर्सिप्पोलिस्सि सुविदिता
या गरिक्कादिदेश्य—
ग्रन्थेष्वेषा विलसति पुरी
मण्डनं या धरायाः ।
अद्याप्यास्या (एशिया) गतमनु—
पमं प्राक्तनं चानुभावं
यूरोप्पीया विमलमतयः
स्वैरमुद्घोष्यन्ति ॥
ततः प्रभृत्यत्र गरीक्देश्य—
श्चाधिकारो निजमाधिपत्यम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संस्थापयामासुरनेकवर्ष—
शतैर्मिते दीर्घतरे च काले ॥

उपेक्षया प्राक्तनसंस्कृतिश्च
ग्रन्थोऽपि पुण्योऽयमवस्तनामा।
धर्मप्रकाराः सरथुस्त्रनिष्ठा—
श्चोन्मूलितप्रायदशामुपेयुः ॥

स्तोकेषु तत्रत्यकुलेषु रक्षां
लब्ध्वा तदंशोऽतिलघुः क्रमेण।
भूते स्वतन्त्रेऽथ पुनश्च देशे
संप्राप्तवान् तत्र महाप्रचारम् ॥

टीका विशिष्टा बहवोऽप्ययस्त—
ग्रन्थावशेषस्य सुरक्षितस्य।
व्याख्यायुताः प्राक्तनसंस्कृतीनां
निर्मापिताः पल्हविभाषया च ॥

धर्मप्रकारोऽथ मुहम्मदस्य
लेभे प्रतिष्ठामपरो नवोऽपि।
भाषारवी चारबतुर्किमुख्य—
वैदेश्यवर्गैर्विजितेऽत्र देशे ॥

भीतास्त्वनेके सरथुस्त्रशिष्याः
पलायमानाः शरणार्थिनश्च।
त्रातुं स्वधर्मं च निजञ्च वेदं
समाश्रिता भारतपुण्यभूमिम् ॥

भाषा परा काचन पारसीक—
देशेषु लब्धप्रसरा बभूव।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रशासितारश्च नृपा विदेश्याः
समागता नूतनधर्मसक्ताः ॥
साहित्यसम्पत्खलु पारसीक—
भूमौ तथापि प्रकटं पुपोष ।
सङ्गीतमालेख्यकला च नित्यं
वृद्धिं ययौ सम्यगवेक्षणेन ॥
पदावली चापि विदेशभाषा—
संक्रामिता वाङ्मयपुष्टिमेव ।
तद्देशवाण्या विदधे कदापि
ह्रासाय सा नैव बभूव भाषा ॥
फर्दोसिराद्योऽथ निसामिरोम—
खय्यं तथा मौल्विरथापि सादिः ।
अन्त्यो हफीसः कवयः क्रमेण
काव्यान्यनर्घाणि वितेनुरेते
प्रायेण दृष्ट्वा किल पारसीक—
भाषारवीवाङ्मयवैष्टितेति ।
नैसर्गिकीं त्वार्य्यकुलप्रसूति
मस्या उपैक्षन्त जनाः क्रमेण ॥
प्रतिष्ठितो वास्तु मुहम्मदस्य
देशान्तरस्थो नवधर्म्ममार्गः
भाषान्तराद् वाङ्मयमप्युपेतु
मिराणिराणेव न चान्यराज्यम् ॥
पुरातना संकृतिरत्र काचित्
परैर्विकृष्टाऽरबीसमुत्था—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इराणप्रदेशैकपृथक्त्वबीजं
देशान्तरेभ्यः प्रकटं विभाति ॥
अवस्तवाख्या प्रथमं अवन्त्या
मध्यस्थया पल्हविभाषया च ।
अर्वाक्तनैषा किल पारसीक—
भाषा लभेताद्य निजां प्रतिष्ठाम् ॥
आयः पदान्यप्यरबीसमुत्था—
न्यपास्य भूरीनरबीप्रयोगान् ।
वाणीं निजामार्यकुलप्रसूतां
शुद्धां विधातुं मतिरप्युपात्ता ॥
अवस्तभाषापि च संस्कृतेन
बद्धा सुगाढं खलु वैदिकेन
व्युत्पत्तिरस्मात्खलु पारसीक—
भाषागता संस्कृतमाश्रितैव ॥
इराणमहीखण्डपुराचरित्रं,
भाषान्तरश्लिष्टमतश्च तेषाम् ।
भाषास्त्वनेकाः सुरियानिमुख्याः
चरित्रहेतोः परिशीलनीयाः ॥
एताद्दशान् स्वीयमतिप्रकारा—
नायोजिता प्रापयितुं प्रवृत्तौ ॥
इराणिषनासीति तथाञ्जुमाने
पूर्वा सभा कैरपि पौरमुख्यैः ॥
पाठक्रमः कश्चन तेषु तेषु
प्रचालितोऽभूद्विषयेषु चात्र ।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. ......6822......

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चरित्रभाषागुणवर्धकश्च
विनीतसंस्कारयुतेषु तेषु ॥
भाषास्वनेकासु सुदीक्षिताश्च
पुराचरित्रे च दृढप्रवीणाः ।
सन्त्यत्र देशे वहवो जना ये
निर्वर्त्तयन्तीदृशकृत्यराशिम् ॥
शिक्षाविधानाय तु संस्कृतस्य
न लभ्यते कश्चन पण्डितोऽत्र ।
उन्मूलितासीत्परमन्त्रिरूपैः
परम्परा संस्कृतकोविदानाम् ॥
अभ्यर्थितो भारतराजदूतः
सभाधिपैः संस्कृतपण्डितस्य ।
आनायने भारतभूविभागा--
दुपाददे युक्ततरं विधिञ्च ॥
निवेदिता भारतराजदूते--
नास्मिन्नियोगे नवदिल्लिसंस्थाः ।
प्रशासितारः सुविचिन्त्य सर्वं
संस्थापयासासुरिमञ्जनञ्च ॥
स्थानं निजं किंचन मद्रपुर्या--
मत्युन्नतं स्वैरगवेषणस्य ।
त्यक्त्वा जनोऽसावथ पारसीक
देशे नवं स्वीकृतवान्नियोगम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निमन्त्रणात्सादरमेकतोऽथ
दाक्षिण्यतः स्वीकृतितोऽपरत्र
गीर्वाणभाषापि च पारसीके
ष्वेवं प्रतिष्ठां पुनरेव लेभे ॥
कालक्रमेण शिथिलीकृतराज्ययुग्म
मैत्री पुनः सुदृढबन्धमवाप्य सैषा
संस्कारपाशततिरचितमद्यतश्च,
लोकस्य भूतहितदैव चिराय जीयात् ॥

मुद्रकः पं० कालीप्रसादशास्त्री
सरस्वतीप्रेसः, अयोध्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri